# सूक्तिसुधातरङ्गिणी

## प्रथमस्तरङ्गः

Initial

पुण्यपत्तनस्थ

'न्यू इंग्लिश स्कूल्' संज्ञक पाठशालायां नियुक्तेन

प्रधानसंस्कृताध्यापकेन

ओकोपनाम्ना पाण्डुरङ्गसूनुना महादेवेन

विरचिता

सा च

पुण्यपत्तने

विजयसंज्ञकमुद्रणयन्त्रालये मुद्रिता

क्रिस्ताब्दाः १९२४

मूल्यं पादोनरूपकः

*Printed at*—'Vijaya Press.' 570 Shanwar, Poona.

BY A. S. GOKHALE

AND

*Published by*—M. P. OKA,

**570 Shanwar peth, POONA.**

ALL RIGHTS RESERVED BY THE AUTHOR.

# List of authors or works wherefrom quotations are Selected.

COMPILED


## A

Addison ... ... 10, 42.
163, 188, 426.
Alfieri ... ... ... 158.
Amiel ... ... ... 123
Andrew Jackson ... ... 280
Anonymous ... ... 85, 291.
... 309, 372, 453.
Antoine de salle ... ... 246.
Anne Finch, Countess of Winchelsea ... ... 458.
Arabian proverb ... 3.
Arist ... ... ... 207.
Aristotle. ... ... 367.
Auerbach ... ... 382.
Aughey ... ... 218
Ausonjus ... ... 264

## B

Bacon ... ... 25, 222.
... 228, 395.
Bayard Taylor. ... ... 8.
Beaumelle ... ... 423.
Bechstern ... ... 127.
Ben. Franklin ... ... 59.
... 133, 339.
Ben Jonson ... ... 191.
Bertrand ... ... 428.
Bible ... ... 259.
Bishop Taylor ... ... 403.
Blair ... ... ... 135.
Bodenstedt 105, 116, 179,
Bovee ... ... 7, 51.
Bp. Porteous ... ... 71.
Bracton ... ... 112.
Bruyere ... 273, 441.
Burke ... ... 430.
Byron ... ... 101.

## C

Campbell ... ... 296.
Carlyle ... ... 94, 345.
... ... 381, 385.
Cato ... ... 251.
Cecil ... ... 392,
Cervantes 165, 399, 437,
Chamfort ... 274, 436,
Channing ... ... 257,
Charles Frederic Goss 104,
Charles Mackay ... 457,
Charron ... ... 194.
Cicero ... 81, 205, 241.
294, 360, 362, 438.
Coke ... ... 263.
Confucius. ... 197, 225.
Corneille ... ... 129.
Colton ... 66, 102, 141.
245, 271, 337.
Cotvos ... ... ... 75.
Cowley ... 34, 439.

## D

Danish proverbs... ... 39.
153, 169, 289.
Diderot. ... ... 164.
Disraeli ... ... 344.
Douglas Jerrold ... 5, 276.
Dr. Frank Crane ... 190.
Dryden ... ... ... 54.
Drummond ... ... 16.
Dutch proverbs... 199, 219.
... ... ... 260.

**E**

Emerson ... 47, 214, 417.
English proverbs ... 13. 17, 46, 88, 89, 136, 156, 159, 166, 176, 177, 186, 193, 203, 223, 258, 261, 270, 278, 286, 288, 301, 302, 305, 317, 318, 319, 326, 330, 366, 375, 378, 388, 389, 391, 413.
Epictetus ... ... ... 64.

**F**

Feltham ... ... ... 340.
French proverbs... 31, 36, 57, 62, 130, 151, 325, 326, 412.

**G**

Garfield ... ... 206, 334, 434,
Gen. Foy ... ... 431,
George Colman the younger ... 353,
George Eliot ... ... 227,
German proverbs ... 1, 50, 72, 74, 107, 231,
Gladstone ... 240, 416.
Goethe ... 172, 210, 308, 310, 315, 364, 374, 407, 424.
Gujarathi proverb ... 313.

**H**

Haliburton ... ... ... 55.
Hare ... ... 299,
Heinrich Heine ... 37.
Henry Home ... 204.
Heraclitus ... 26.
Herodotus... ... 248.
Hippel ... ... 244.
Homer ... ... 370.
Horace ... ... 24, 98, 249, 347
Howe ... ... 448.
H. W. Shaw... ... 429.
Hume... ... ... 92.

**I**

Italian proverbs ... 58. 198, 327.

**J**

J. Roux ... ... 174.
James Montgomery ... 456.
John Ford ... ... 181.
Johnson ... 56, 300, 332, 346, 383, 384.
John Tobin ... ... 314.
Joubert ... ... 224, 250.
Juvenal ... ... 96, 173.

## K


Keble ... ... 110, 446.
Klinger ... ... 77.
Krummacher ... 450.


## L


Laber ... ... 120.
Lactantius ... ... 93.
La Fontaine ... 11, 312.
Landor ... ... 368.
Laplace ... ... 311.
La Roche. ... ... see Rochefoucauld.
Lavater ... 196, 292. 298, 398.
Law ... ... ... 106.
Leigh Hunt... ... 134.
Lessing ... ... 73, 386.
Lord Avebury ... ... 338.
Lord Beaconsfield ... 414.
Lord Chesterfield ... 78.
Lord Landsdowne ... 282.
Longfellow ... ... 114.
Lowell ... ... 237.
Lucan ... ... ... 266.
Luther ... ... ... 211.


## M


Macaulay ... ... 350.
Machiavelli ... ... 307.
Mahomet ... ... 348.
Marathi proverbs ... 12. 14, 19, 20, 41, 49, 53, 97, 108, 111, 113 121, 124, 128, 137, 160, 209, 234, 238, 252, 265, 377, 433, 435.
Martial ... ... ... 195.
Martin Optiz ... ... 256.
Menader ... ... ... 132.
Monvel ... ... ... 150.
Motto ... 185, 285.
Mrs. Stowe ... ... 255.
Murphy ... ... ... 268.
Mme de Sevigne ... 35.
Mme de Stael ... ... 253.
Montesquieu ... ... 171.


## N


Nable ... ... ... 148.
Napoleon ... ... ... 201.


## O


Oken ... ... ... 401,
Old song ... ... ... 180,
Original ... 27, 28, 33, 61, 80, 95, 143, 147, 178, 183, 226, 236, 281, 343, 355, 357, 373, 393, 394, 396, 420, 422, 443, 451, 455, ... 460, 461.
Ovid ... 6, 103, 170, 359.

## P

Pascal... 140, 229, 425.
Pasquier Quensnal ... 155.
Payne ... ... ... 454.
Persian song ... ... 452.
Phâedrus ... 213, 352.
Plato the younger ... 421.
Plaut ... ... ... 336.
Plautus ... ... ... 235.
P. Leonard ... 145, 232.
Pope... 23, 267, 328, 410.
Port. proverbs ... 154, 322.
Publius Syrus ... 67, 168. 331, 363.
Prior ... ... 109.
Prof. Blackie ... ... 91.
Pythogoras ... ... 427.

## Q

Quinctilian ... ... 22.
Quarles ... ... 200, 447.

## R

Rabelais... ... ... 139.
Raleigh and Elizabeth... 390.
R. Gutzkov ... ... 247.
Rivarol ... ... ... 208.
Rogers ... ... 21.
Rochefoucauld... 40, 68, 115, 144, 284, 304, 415.
Rousseau ... ... 172.
Ruskin ... 79, 84, 149, 442.
Rowe ... ... ... 83.

## S

Sallust ... ... 192.
S. Butler ... ... 9.
Schiller ... 119, 404.
Schopenhauer.. 342, 440.
Scotch proverb... ... 162.
Seneca ... 48, 63, 212. 275, 283, 366, 369, 408, 418, 432, 449.
Shakespeare ... 15, 32, 44, 45, 52, 87, 117, 118, 126, 142, 152, 157, 161, 167, 187, 220, 221, 233, 239, 243, 277, 293, 316, 320, 397, 405, 419.
Socrates ... 90, 216, 387.
Sophocles ... ... 335.
Spanish proverbs ... 295. 323, 411.
Spenser... 60, 269, 321, 444.
Steel ... ... ... 65.
Sterne ... ... 70, 371.
Stopford Brooke ... ... 445.
Solon ... ... ... 69.
Swift ... ... 86, 184, 202.
St. Paul ... ... 290.
Sir P. Sidney ... 146, 272.
Sir Robert Howard ... 303.
Sir W. Temple... ... 394.

## T

Tacitus ... ... 112, 217.
Talmud ... ... 175, 230.
Terence ... 324, 361, 376.
... ... ... 402.
Tennyson ... ... 341.
Tillotson ... ... ... 333.
Theodar Parker ... 29.
Thomas a Kempis ... 82, 189.
Trollope ... ... ... 380.
Tupper ... ... ... 125.
Tukarama ... ... 18, 182.
Tulsidasa ... ... ... 329.

## U

Uhland ... ... ... 2.

## V

Victer Hugo ... ... 279.
Virgil ... ... ... 4.
Voltaire ... 99, 131, 400.

## W

Walton ... ... ... 306.
Ward Beecher ... 242, 265.
... ... ... 297.
Warwick ... ... ... 462.
Whittier ... ... ... 100.
Whately ... ... ... 287.
W. Hawff ... ... ... 409.
Wm. Penn ... ... ... 76.
Wordsworth ... ... 215.

## Y

Young ... 38, 43, 138, 351, 406.

## Z

Zimmerman ... ... 262.
Zoraster ... ... ... 30.

# PREFATORY NOTE.

The cordial welcome with which my Sanskrit versions of about 300 quotations from various Western authors introduced in my अभिनवरत्नमाला Part II. have been received by the Sanskrit reading public has encouraged me to publish a separate volume containing Sanskrit versions of a number of other quotations of the same type. What success I have achieved in this labour of love, I leave my readers to judge. If I have the good fortune to see that this attempt of mine does interest those for whom it is intended, I mean to bring out more volumes (तरङ्ग s.) of the सूक्तिसुधातरङ्गिणी on a more comprehensive scale.

# INTRODUCTION

I agreed to write a few words of introduction to Mr. Oka's collection of English quotations rendered into Sanskrit, just because I thought that it would be a courteous way of acknowledging the debt I owe him for the many hours of delight I spent in his company when he read out to me the quotations and his excellent Sanskrit renderings of the original passages. The writer of introductions to books written by others acts the part of chorus in ancient drama. The public doesn't fancy such interpreters in these advanced days. They would rather deal directly with the author. Good wine, says the old English proverb, needs no bush, or, as a Sanskrit poet says, न हि कस्तूरिकामोदः शपथेन विभाव्यते. Moreover, I recalled the existence of many Sanskrit scholars who are far better qualified for this work than I. These considerations held me back for a time, but it is hard to refuse a request made by one of such transparent sincerity of purpose as Mr. Oka and I undertook the job in the hope that it would give me an opportunity to praise a friend who deserves all the good things one may say of him.

Mr. Oka has endeared himself to all lovers of Sanskrit by the two parts of अभिनवरत्नमाला which he published some time ago. By offering to the public this collection of quotations from European authors which he has rendered into Sanskrit (सूक्तिसुधातरङ्गिणी), he will have added one more title to their admiration and esteem. In these renderings of English quotations, Mr. Oka breaks new ground; I do not know that any one has essayed the task before. The author of the three parts of लौकिकन्यायाञ्जलि has put together a good many Sanskrit maxims and proverbs and wherever possible has given their English equivalents. But his work was essentially different and limited in scope. Mr. Oka's quotations cover a wider field. It is a collection of extracts made from writers well-known all over Europe and Mr. Oka has rendered them into his easy, fluent, graceful Sanskrit. As a rule, the translation follows the original lines of prose or verse and even if there

is a foreign flavour in the translated idea, the reader has no difficulty in understanding the drift of the quotation. Very frequently, however, it is hard to detect the original and its Sanskrit translation. The two are like new-born twins or to vary the image, they are like twin flowers springing from the same stem and branching on either side of it.

There are 462 pieces in this collection. Most of them are quotations from famous writers. Occasionally, Mr. Oka translates proverbs, English, French, Gujarathi, Marathi and others. Sometimes he gives thoughts of his own which are expressed in a terse, pointed style. Towards the close, longer pieces are given and a few adaptations in Sanskrit verse of English lyrics, along with a few poems of his own which have their originals in his individual experience and feelings.

Broadly speaking, the book is an anthology or posy of aphorisms, maxims, sayings, proverbs, instinct with the experience of the world and the wisdom that is the fruit of experience. We have in these quotations the thoughts of the great and wise masters of life,—to adopt the words of Lord Morley—on the eternal commonplaces of human occasion—friendship, health, bereavement, riches, poverty, death. It is a literary chapter, says Morley, which concerns life, manners, society, conduct, human nature, our aims, our ideals and all besides that is most animated in man's busy chase after happiness and wisdom. Mr. Oka has, indeed, cast his net wide and his selection evinces a truly catholic point of veiw. For we have sentences and lines of verse in this book which reveal the shrewdnes and penetrating insight of one writer, the biting, bitter wit of another, the kindly genial humour of a third. Now we admire the brlliance of words and phrases, now the point, the concision, the delicacy of the art with which the thonght is turned, now it is the depth and infinity of suggestion enshrined in a tiny, wee sentence which evoke our wonder and admiration. The wisdom of the ages is 'hived in these pages.' As we read the quotations which are garnered

here, we are enlightened, roused, uplifted, ennobled. They illuminate the understanding and point the way to right conduct. Mr. Oka's little volume offers what has been justly described as the literature of morality ; it teaches and preaches. In a sense it is a criticism of life, but not in the sense in which the words are employed by Arnold in his famous definition that 'Poetry is at bottom a criticism of life.' Criticism is a word of unhappy associations, especially when it is used in regard to an essentially creative art, such as poetry and Arnold has paid heavily for this mistake. The criticism of life embodied in the many quotations in this book is in the majority of examples destitute of poetic qualities. For poetry presents truths of human life in the enkindling glow of imagination and passion and it clothes them in images and words of haunting charm and imperishable music. In the passages translated by Mr. Oka, we have only the cold brilliance of intellect. The phrases and words are clear-cut, chiselled ; they arrest attention by their brilliance, polish and epigrammatic brevity. The cold light of reason and intellect rests on them. They do not possess the bewitching loveliness of colour and sound which one expects in poetry. But that can hardly be accounted as Mr. Oka's fault.

There are quotations in this collection from Tacitus, Epictetus, Shakespeare and Goethe. One meets with Bacon and Ben Jonson, Carlyle, Emerson, Confucius. We have Aristotle, Seneca, Pascal, Pope and La Bruyere. All these are far-shining names in European literature, and there are many others which I have not mentioned. Shakespeare figures prominently in these extracts and Goethe has also been freely laid under contribution. There is a large number of proverbs from various languages. Most of these quotations are short and concise. They express a mass of meaning in a few words. For the sense is brought to a point. There is an alertness in these lines and sentences, an intensity of thought, a delicacy of word and phrase, a polish and a sparkle which account for the fascination they have for most readers.

As a translator of these quotations, so pregnant with wit and wisdom, Mr. Oka has done his work admirably. Dryden laid down two qualifications for a translator. "The qualification of a translator worth reading", observes Dryden, "must be a mastery of the language he translates out of and that he translates into," but Dryden will condone a deficiency of mastery of the language of the original. No one who knows Mr. Oka will doubt his mastery of Sanskrit and the translations offered in this book will convince those who do not know him and have not read his earlier books. Another principle which Dryden enunciates is that 'a translator who would write with any force or spirit of an original must never dwell on the words of an author.' Mr. Oka bears this well in mind. He never clings fatuously to the words of the original, but plucks the soul out of them and invests the Sanskrit translation with an atmosphere of its own. The result is, his translations are just and accurate and mirror forth the meaning and spirit of the nogriial By not concentrating overmuch attention on the words of the original, Mr. Oka has avoided obscurity ; and he never burlesques the original which is also the result of dwelling too much on the words of the author who is translated. In the many passages which he has rendered in Sanskrit, there are only a few in which 'the idiom of the original disturbs the reader' because the ghost is not successfully laid.

This is all that a translator may hope to achieve. For the capital difficulty of translation—as Dr. Tagore pointed out once—is that it may be a reincarnation, but it cannot be identical. This is obvious because the sound of a word has a significance utterly apart from its meaning. Further, if the music and melody of words and the individual rhythms of a language are untranslatable, there are a hundred suggestions and associations bound up with words which cannot be shifted from one language to another as though they were dead stuff which might be hauled up from one trolley into another. "A version of a poem" adds Dr. Tagore, "may

be a finer piece of work, but it is not the same piece of work." Most of Mr Oka's translations are reincarnations and some of them are finer pieces of work than their originals. His only defect as a translator is that sometimes he adds to the original and alters it. On occasions this is due to exigencies of metre, but it is sound policy to keep one's hands off the passage quoted.

To give a few illustrations: The quotation from Vergil (No. 4)—"Don't celebrate your triumph before you have conquered—" expresses the common idea, "Don't haloo till you are out of the wood." Mr. Oka not only renders it aptly —अजित्वा नैव कुर्वीत कदापि जयघोषणाम्—but clothes it in an old-world atmosphere. For the word जयघोषणाम् recalls the well-known line in 'उत्तररामचरितम्' 'अयमश्वः पताकेयमथवा वीरघोषणा'. Such words and phrases as the घोषणा mentioned above are steeped in time-honoured associations and suggestions. They spring unbidden to Mr. Oka's lips and lend him potent help in naturalizing foreign thoughts in Sanskrit translation. Another example occurs in his translation of a German proverb (No 72) 'A penny by right is better than a thousand by wrong.' This is rendered by

'एकः काणवराटोऽपि धर्मेणाधिगतो वरम्।
न त्वधर्मेण संप्राप्ताः सहस्रमपि रूपकाः॥'

The word काणवराट at once takes us back to Bhartrihari's line, प्राप्तः काणवराटकोऽपि न मया तृष्णेऽधुना मुञ्च माम्.' The employment of such a word produces in a trice the right atmosphere of Sanskrit poetry. It sets the reader at ease. Time and again, Mr. Oka's translation is well-nigh perfect. The quotation from Ward Beecher is a good example—No. 242—"Compassion will cure more sins than condemnation" पापापनोदने हेतुर्नानुकम्पेव गर्हणा. Here not a syllable can be spared nor can a syllable be added. The translation fits the original as a glove fits the hand. It is easy to multiply examples: Nos. 41, 44, 47, 83 must suffice for our present purpose. Sometimes he adds to the beauty

of the original by expanding the thought, or by introducing a new image. No. 155—'Truth irritates only those...'—is an example of this last. The metaphor बोधरवि: does not appear in the original and it endows the translation with an added attraction of its own. In No. 106–Mr. Oka states the contrary of the original which does not appear in the passage quoted. Such additions and alterations have their dangers, of course; for they result in padding and take away from the charm of the original by spoiling its 'pregnant brevity and wit.' There are a few instances, again, where his love of melody has betrayed him into making an addition to the original words. This has happened in No. 113. On the other hand, time after time, Mr. Oka achieves melody in these verse-translations without calling in the assistance of aditional words. Nos. 116, 187, 188, furnish good illustrations. Here and there, he fails to translate accurately and in a few of his Sanskrit renderings the foreign idiom remains a disturbing factor. No. 117 is, I believe, incorrecetly rendered. In No. 118 the rose flower appears as 'गुलाब' संज्ञं कुसुमं and in No. 9 शृङ्गारनामा बटु: sounds harsh to my ears. In No. 305 the same alien note is heard. Finally, Mr. Oka may be justly charged with the inclusion of some trivial quotations–such as Nos. 129 and 313.

The multiplicity and variety of quotations in this book will meet all kinds of tastes. A moralist will rejoice in No. 194 which lays down a rule of conduct. A statesman will find No. 181 very much to his taste, for it touches on the prime duty of kings towards their subjects. A humourist will be delighted with No 142. A philosopher will smile as he reads No. 293 Most of us will find an echo of our experience in No. 198. The quotations which make the strongest appeal to me are those which set me thinking, start a train of suggestions, literary or other–those which open up the chambers of the reader's mind and seem in Bradley's words "to beckon away beyond themselves and to expand into something boundless." It is in such passages as these that I find my highest delight. No. 15—"A dog is obeyed in

office" calls to my mind Napoleon's famous saying "Power is never ridiculous." And then I remember the proverb in the vernacular which speaks of the cur that dwells in a great man's house,—the Jack-in-office who guards the gate and insults with impunity the biggest people of the place when they have occasion to call on his master. And such cheeky behaviour puts me in mind of Isabel's words in Measure for Measure "Man, proud man, drest in a little brief authority like an angry ape plays such fantastic tricks as make the angels weep." I read No. 160—"Pain past is pleasure"—and a line from Kalidasa leaps to my mind

'प्राप्तानि दुःखान्यपि दण्डकेषु संचिन्त्यमानानि सुखान्यभूवन्'

This last suggests the contrasted scene in उत्तररामचरितम् where Rama is unable to look at the canvas portraying the scene of his separation from Seeta and bids Lakshmana refrain from unrolling it any further. This in turn suggests the idea—"How do the great and the rich feel when they are victims of calamity?—and one remembers Tennyson's translation of Dante's line "A sorrow's crown of sorrow is remembering happier days." I read No. 21—The good are better made by ill, | As odours crushed are sweeter still. It recalls the parallel thought in Bacon "Certainly virtue is like precious odours, most fragrant when they are incensed or crushed; for prosperity doth best discover vice but adversity doth best discover virtue" and how kindred is the thought in Jagannath!

आपद्गतः खलु महाशयचक्रवर्ती, विस्तारयत्यकृतपूर्वमुदारभावम् ।
कालागुरुर्दहनमध्यगतः समन्ताल्लोकोत्तरं परिमलं प्रकटीकरोति ॥

I read the translation of the proverb-No. 49-'आत्मना नात्मनः पृष्ठं द्रष्टुं केनापि शक्यते' and I remember the well known Nyaya

'न हि सुशिक्षितोऽपि नटबटुः स्वस्कन्धमधिरोढुं पटुः'

Finally, in the quotation from Cicero—"Liberty consists in the power of doing that which is permitted by law" we have a whole volume of noble thoughts packed into a short sentence. It is the gospel of liberty preached with such splendour of eloquence by Burke and Wordsworth.

The brief aphoristic style of expression is nothing unfamilar to readers of Sanskrit literature. Almost every writer of distinction in Sanskrit can turn his hand to the work and make a successful job of it. Kalidasa has such fine close-knit expressions as 'आज्ञा गुरूणां ह्यविचारणीया,' 'तेजसां हि न वयः समीक्ष्यते' Kalidasa is, again, the author of that celebrated line 'अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः' Bhavabhuti has 'सर्वथा व्यवहर्तव्यं, कुतो ह्यवचनीयता,' 'सर्वंकषा भगवती भवितव्यतैव' Bharavi has 'विचित्ररूपाः खलु चित्रवृत्तयः' 'दिशत्यपायं हि सतामतिक्रमः' 'प्रकृत्यमित्रा हि सतामसाधवः' but if I go on quoting like this I shall never finish. The harvest is ready to be gathered and I cannot imagine a person better fitted for the task than Mr. M. P. Oka He tells me he has already started collecting such maxims and sayings Let me hope that before very long he will publish a goodly volume of such choice sayings culled from Sanskrit poets and prosaists Let him put the Sanskrit quotations side by side with quotations from European writers. So will the East dwell in happy harmony with the West in the domain of literature which recognises no delimiting frontiers.

I shall close this brief introduction by thanking Mr. Oka once again for the feast of reason which he has provided in this book ; others, when they will have read the book, will, I have no doubt, entertain the same feeling of warm gratitute towards the author. Much that is good and enjoyable in this book I have, perhaps, left unnoticed; partly, owing to limitations of space, partly, doubtless, to my blindness. I have hinted at a few faults, but, they hardly make any show against the many striking merits of the book. It is indeed a fine achievement to have translated nearly 500 pieces ( most of them in verse ) and revealed such surprising excellence in translation.

POONA,
*20th March 1924.*

R. K. LAGU

# किमपि निवेदनम्

भानुर्दिवोदेतु विधुश्च रात्रौ
बाह्यं तमो नाशयितुं समर्थौ ।
आभ्यन्तरं तु प्रभवन्ति नित्यं
तमो निहन्तुं विदुषां वचांसि ॥ १ ॥

अतश्च तत्तद्विबुधोपसेविता
जगद्धिता सूक्तिसुधातरङ्गिणी ।
महाप्रयासेन मयात्रतार्यते
भगीरथेनेव सुधान्धसां सरित् ॥ २ ॥

सर्वभाषासु सुरसा सर्वमानसहारिणी ।
महीगतसुधैवान्या मन्ये गीर्वाणभारती ॥ ३ ॥

अतो गिरानयैवायमनुवादो विधीयते ।
नानाविषयवास्तव्यविद्वद्वचनसंततेः ॥ ४ ॥

# गीर्वाणवाणीस्तवः

जयति जयति विबुधभारती जयति
रासकवृन्दसदसि लसति ॥ ध्रु० ॥
मृदुमञ्जुलवचनामृतधारां श्रवसि किरन्ती ॥
मधुरमनोहरसुन्दरवेषा भुवि विचरन्ती ॥
स्वगुणैरितरा भाषायोषाः समुपहसन्ती ॥
तोषं विदुषां सर्वेषामपि हृदि जनयन्ती ॥

---

अमृतं संस्कृतं चोभे नितान्तमधुरे इति ।
सेव्येते अमरैर्नित्यं नरैर्धन्यैस्तु संस्कृतम् ॥

अहो अमरवाणीयं मृतेति विदुषां वरैः ।
जोघुष्यतेऽविचार्यैव सर्वैरपि समस्वरम् ॥

जराजीर्णशरीरापि वाणी निर्जरसामियम् ।
मन्दचारापि नो मृत्युं गमिष्यति कदाचन ॥

यावद्भागीरथी तिष्ठेत् प्रवहन्त्यत्र भारते ।
तावदेषा म्रियेतैव मन्ये विबुधभारती ॥

श्रीमद्रामायणे यावद् रमन्ते रसिका भुवि ।
तावद्गीर्वाणवाणीयं निर्वाणं कथमेष्यति ॥ ॥

विद्यमाने च विन्ध्याद्रावचले च हिमाचले ।
स्थिरीभूता कथं न्वेषामरवागुपरंस्यति ॥

पुरा दीव्यति देवीयं द्योतयन्ती भुवस्तलम् ।
अमरैरुपसेव्यत्वान्मरणाय न कल्पते ॥
जनन्या इव वृद्धाया अस्याः स्वतनयास्विव ।
निर्भरं देशभाषासु प्रेम सर्वासु दृश्यते ॥
जननाद्रक्षणादासां भरणाच्छिक्षणादपि ।
एषा मातृत्वमायाता सर्वासां सर्वसंमतम् ॥
सुवर्णमयमासेव्य रसायनमियं परम् ।
वार्द्धक्येऽपि सुपुष्टत्वादात्मजापोषणक्षमा ॥
अस्या अङ्गानि दृश्यन्ते स्थास्नूनि बलवन्ति च ।
तरुण्या इव राजन्तेऽलंकारैर्भूषितानि च ॥
तनयामण्डने नित्यं सादरेयं विलासिनी ।
नानाविलासशिक्षायामाचार्यत्वं बिभर्ति च ॥
सरसान्पदविन्यासान् हावभावान्नवान्नवान् ।
दिशतीं तरुणीं नेमां मन्येत रसिको नु कः ॥
देशभाषाभिधा बालाः क्व बालोचितविभ्रमाः ।
वृद्धानामपि तारुण्यं दधाना क्वेयमङ्गना ॥
विमोहयति चेतांसि परेषामपि वागियम् ।
कलावतामपि स्वेषां नेमा अद्यापि संमताः ॥
श्रुतीः श्रावयन्ती स्मृतीः स्मारयन्ती
पुराणानि रम्याः कथा गापयन्ती ॥
मनोज्ञानि काव्यानि विस्तारयन्ती
कथं भारतीयं मृतेति ब्रुवन्ति ॥

# सूक्तिसुधातरङ्गिणी

## ( प्रथमस्तरङ्गः )

— 1 —

**GERMAN PROVERB—**

The eyes believe themselves, the ears other people.

अक्ष्णोरात्मनि विश्वासः परेष्वेव तु कर्णयोः ।

— 2 —

**UHLAND—**

The life of man is a short blossoming and a long withering.

अचिरं विकसति सुचिरं म्लायति
हा हा जीवितकुसुमं जगति ।

or

उन्मीलत्यचिरं निमीलति चिरं जीवप्रसूनं भुवि ।

— 3 —

**ARABIAN PROVERB—**

He that knows not and knows not that he knows not is stupid. Shun him.

अजानन् यो न जानाति न जानामीत्यपि स्वयम् ॥
स तत्त्वतो न जानाति मूर्खं तं परिवर्जयेत् ॥

— 4 —

**VIRGIL—**

Don't celebrate your triumph before you have conquered.

अजित्वा नैव कुर्वीत कदापि जयघोषणाम् ।

— 5 —

DOUGLAS JERROLD—

The blackest of fluids is used as an agent to enlighten the world. ( said of ink.)

अतिकृष्णो द्रवः कोऽपि निपुणैरुपयुज्यते ।
साधनत्वेन जगतः समुद्भासनकर्मणि ॥

— 6 —

OVID—

It is more disgraceful to turn a guest out than not to admit him.

अतिथिः प्रविशन्नेव वरमादौ निवारितः ।
न तु निष्कासितः पश्चात्ततो नीचतरं नु किम् ॥

— 7 —

BOVEE—

As many suffer from too much as too little.

अतिरेकोऽपि दुःखाय व्यतिरेको यथा नृणाम् ।

— 8 —

BAYARD TAYLOR—

The bravest are the tenderest,
The loving are the daring.

अतिशूरा अतिकोमलहृदयाः
साहसिका अतिरूढप्रणयाः ।

— 9 —

S. BUTLER—

Love is a boy by poets spoiled.

अत्यर्थं बत लालितोऽत्र कविभिः शृङ्गारनामा बटुः ।

— 10 —

**ADDISON—**

We are always complaining our days are few, and acting as though there would be no end of them.

अत्यल्पमायुरिति सर्वजना वदन्ति
जात्वस्य न क्षय इतीव धिया नयन्ति ।

— 11 —

**LA FOUNTAIN—**

Of our enemies the smallest are often the most to be dreaded.

अत्यल्पोऽपि रिपूणामसकृदनल्पं भयं कुरुते ।

— 12 —

**MARATHI PROVERB—**

अति खाणें आणि मसणांत जाणें.

अत्यशने रममाणः स्वयं श्मशाने समीहते शयितुम् ।

— 13 —

**ENGLISH PROVERB—**

We pay when old the excesses of our youth.

अत्याचारा यौवने ये कृताः स्यु-
स्तेषां कार्या निष्कृतिर्वार्द्धके नः ।

— 14 —

**MARATHI PROVERB—**

अन्नाचा मारलेला खालीं पाही, तरवारीचा मारलेला वर पाही.

अधः पश्यति को लोके नाहारेण वशीकृतः ।
प्रहारेण तु शस्त्रस्य सर्वोऽप्युपरि पश्यति ॥

— 15 —

**SHAKESPEARE**—

A dog is obeyed in office.

अधिकारपदे कृतस्थितेः
प्रभवत्येव शुनोऽपि शासनम् ।

— 16 —

**DRUMMOND**—

He lives who dies to win a lasting name.

अधिगन्तुमनश्वरं यशो
म्रियते यो मनुजः स जीवति ।

— 17 —

**ENGLISH PROVERB**—

He that buys what he does not want, must often sell what he does want.

अनवश्यानि वस्तूनि यः क्रीणाति वृथा कुधीः ।
तेनावश्यमवश्यानि विक्रेतव्यानि कर्हिचित् ॥

— 18 —

**TUKARAMA**—

न लगे मायेसी बाळें निरवावें । आपुल्या स्वभावें ओढी त्यासी ॥

अनाराधिता बालकेनापि माता
तदाराधनाय स्वभावात्प्रवृत्ता ।

— 19 —

**MARATHI PROVERB**—

आंधळ्याच्या गाई देव राखतो.

अन्धस्य गा रक्षति गोकुलेशः ।

— 20 —

**MARATHI PROVERB—**

आंधळें दळतें आणि कुत्रें पीठ खातें.

अन्धे धान्यं पिनष्टि पिष्टं शुनकेन भक्ष्यते स्वैरम् ।

— 21 —

**ROGERS—**

The good are better made by ill.
As odours crushed are sweeter still.

अपकारेण साधूनां साधुत्वमधिकाधिकम् ।
पेषणेनेव गन्धानां सौरभ्यमभिवर्धते ॥

— 22 —

**QUINCY—**

They who wish to appear learned to fools will appear fools to learned men.

अपण्डितेषु पाण्डित्यं प्रदिदर्शयिषन्ति ये ।
अपाण्डित्यं पण्डितेषु तेषामाविर्भविष्यति ॥

OR

पण्डिता भातुमिच्छन्ति मूर्खाणां ये नरोऽग्रतः ।
पुरा भान्ति हि ते मूर्खाः पण्डितानां पुरः स्वयम् ॥

— 23 —

**POPE—**

An honest man's the noblest work of God.

अपापमनसः पुंसो निर्मितिं जगतीतले ।
विधातुः परमोदारां कृतिमाहुर्मनीषिणः ॥

— 24 —

**HORACE—**

Money has no splendour of its own, unless it shines by temperate use.

अबिभ्रती भासुरतां स्वभावा-
न्मितोपभोगेन विराजते श्रीः।

— 25 —

**BACON ( FROM SENECA )—**

The good things which belong to prosperity are to be wished, but the good things that belong to adversity are to be admired.

अभीप्सितव्याः खलु संपदो गुणाः
प्रशंसनीया विपदस्तु केवलम्।

— 26 —

**HERACLITUS—**

The gods are immortal men, and men are mortal gods.

अमरा मानवा देवा देवा मर्त्याश्च मानवाः।

— 27 —

अये लक्ष्मि किं देवतालक्ष्म तत्ते
भृशं चञ्चला निर्विवेका च यत्त्वम्।
वृथा गेहिनी कल्प्यसे मन्दधीभि-
र्दिवि श्रीमतो धाम्नि विष्णोर्वसन्ती॥

— 28 —

अर्थानपात्रे प्रतिपादयन्तः
पात्रे यथाकालमनुत्सृजन्तः।
"अर्था अनर्थाय महीयसेऽत्र"
लोकोक्तिमेतां परिपोषयन्ति॥

— 29 —

THEODERE PARKER—

Covetuous men need money least, yet most affect it and prodigals who need it most, do least regard it.

अर्थेन नार्थी कृपणोऽतिलुब्ध-
स्तथापि तं प्रार्थयते प्रकामम् ।
अर्थे त्वनास्थो व्ययकृद्विमूढः
प्रयोजनं यद्यपि तस्य तेन ॥

— 30 —

ZORASTER—

When you are in doubt abstain.

अर्थेषु सन्देहपदेषु सत्सु
वरं विरामो न पुनः प्रवृत्तिः ।

— 31 —

FRENCH PROVERB—

Money is a good servant but a bad master.

अर्थो भृत्यो मानवानां प्रशस्यो
बिभ्राणोऽसौ भर्तृभावं तु निन्द्यः ।

— 32 —

SHAKESPEARE—

If money go befor, all ways do lie open.

अर्थो येषां पुरोयायी मार्गस्तेषां न रुध्यते ।

— 33 —

अल्पकार्यकरा ये स्युः प्रायस्ते बहुभाषिणः ।
न वर्षन्ति शरत्काले मेघा गर्जन्ति केवलम् ॥

— 34 —

COWLEY—

Poverty wants some, luxury many, and avarice all things.

अल्पमेवार्थविकलो बहुलं भोगलोलुपः ।
लोभाकुलश्च सकलमर्थजातमभीप्सति ॥

— 35 —

MME. DE SEVIGNE—

With a little patience we should save ourselves a great deal of regret.

अल्पानल्पं धृतिरनुशयं वारयेन्मानवानाम् ।

— 36 —

FRENCH PROVERB—

Little wealth, little care.

अल्पे वित्ते । चिन्तात्पा ते ।

— 37 —

HEINRICH HEINE—

It is easy enough to forgive your enemies if you have not the means to harm them.

अविद्यमाने ह्यपकारसाधने
क्षमा प्रयोक्तुं सुकरैव शत्रुषु ।

— 38 —

YOUNG—

Unlearned men of books assume the care
As eunuches are the guardians of the fair.

अविद्वांसस्तथा भान्ति नियुक्ता ग्रन्थरक्षणे ।
यथा कञ्चुकिनो वृद्धाः शुद्धान्तावनकर्मणि ।

— 39 —

**DANISH PROVERB—**

Bad is never good till worse befall.

अशोभनं शोभनतां न याति
ततोऽपि नाशोभनमेति यावत् ।

— 40 —

**LA ROCHE—**

To praise princes for virtues which they do not possess, is to insult them with impunity.

असतोऽपि गुणान् राज्ञां यःस्तौतीऽविचारयन् ।
दण्ड्योऽप्यप्राप्तदण्डोऽसौ नूनमेतान्विनिन्दति ॥

— 41 —

**MARATHI PROVERB—**

असंगाशी संग केला, प्राणाशी गाठ.

असद्भिः सङ्गो नियतमसुभङ्गाय भवति ।

— 42 —

**ADDISON—**

Our friends see not our faults, or conceal them, or soften them.

असमदीयान्न पश्यन्ति प्रायो दोषान् सुहृज्जनाः ।
दृष्ट्वा वापि विगूहन्ति ब्रुवन्तो म्रदयन्ति वा ॥

— 43 —

**YOUNG—**

If wrong our hearts, our heads are right in vain.

अहह हार्दि सदोषे को गुणो धीगुणैर्नः ।

— 44 —

SHAKESPEARE—

O ! how full of briars is this working-day world !

अहो कण्टकमय्येषा कर्मभूमिर्विभाति मे ।

— 45 —

SHAKESPEARE—

O ! that man's ears should be
To counsel deaf, but not to flattery.

अहो बत महच्चित्रं यत्कर्णौ बधिरौ नृणाम् ।
उपदेशे श्रूयमाणे परस्मान्न पुनः स्तवे ॥

— 46 —

ENGLISH PROVERB—

No man loveth his fetters, be they made of gold.

अहो सुवर्णमय्योऽपि शृङ्खलाः कस्य वल्लभाः ।

— 47 —

EMERSON—

Good thoughts are no better than good dreams unless they be executed.

आचाररूपा यदि नो विचाराः
स्वप्नोपमास्ते खलु साधवोऽपि ।

— 48 —

SENECA —

He is the most powerful who has himself in his power.

आत्मन एव प्रभवन् प्रबलतमः प्रोच्यते प्रभुः प्राज्ञैः ।

— 49 —

**MARATHI PROVERB—**

आपली पाठ आपणासच दिसत नाहीं.

आत्मना नात्मनः पृष्ठं द्रष्टुं केनापि शक्यते ।

— 50 —

**GERMAN PROVERB—**

Even the lion has to defend itself against flies.

आत्मा स्वकीयः किल मक्षिकाभ्यो
मृगाधिपेनापि हि रक्षणीयः ।

— 51 —

**BOVEE—**

Music is the fourth great material want of our natures—first food, then raiment, then shelter, then music.

आदावन्नं ततो वस्त्रं ततो गेहमवश्यकम् ।
सङ्गीतेन विना त्वेतच्छून्यवन्मन्यते त्रयम् ॥

— 52 —

**SHAKESPEARE —**

How much better it is to weep at joy than to joy at weeping?

आनन्दस्य पदं मा भूदश्रुमोक्षणदर्शनम् ।
अहो धन्यः कोऽपि कुर्यादानन्देनाश्रुमोक्षणम् ॥

— 53 —

**MARATHI PROVERB—**

नाक दाबलें कीं तोंड उघडतें.

आननोद्घाटनोपायो नासारन्ध्रनिरोधनम् ।

— 54 —

**DRYDEN**

Devotion in distress is born, but vanishes in happiness.

आपद्युत्पद्यते भक्तिस्तिरोभवति संपदि ।

— 55 —

**HALIBURTON—**

No man is rich whose expenditures exceed his means; and no one is poor whose incomings exceed his outgoings.

आयाधिकं व्ययं कुर्वन् को न याति दरिद्रताम् ।
यस्य व्ययाधिकस्त्वायः स धनी न धनी धनी ॥

— 56 —

**JOHNSON—**

Life however short, is made still shorter by waste of time.

आयुर्नरस्यात्पमपि स्वभावात्
कालव्ययेनाल्पतरत्वमेति ।

OR

आयुः कालव्ययेनाल्पं कुर्वन्त्यल्पतरं नराः ।

— 57 —

**FRENCH PROVERB—**

Life is half spent before we know what life is.

आयुः किमित्यजानानामर्धं याति वतायुषः ।

— 58 —

**ITALIAN PROVERB—**

Listen, see and say nothing, if you wish to live in peace.

आयुःशान्तिमयं कर्तुं येऽभिवाञ्छन्ति तैरिह ।
दृश्यतां श्रूयतां सर्वं मा पुनः किंचिदुच्यताम् ॥

— 59 —

**FRANKLIN—**

Gain may be temporary and uncertain, but even while you live expense is constant and certain.

आयो भवतु वित्तस्य क्षणिकोऽप्यध्रुवोऽपि वा।
व्ययो नित्यो निश्चितश्च यावज्जीवं नृणां सखा॥

— 60 —

**SPENSER—**

The gentle mind by gentle deeds is known.

आर्यत्वं मनसो नरस्य चरितैरार्यैः परिज्ञायते।

— 61 —

आर्या भार्या यस्य वित्ताद्यहार्या
नम्रा कम्रा धन्य एकः स पुंसाम्।
यस्या भर्ता सानुरागोऽनुकूलः
सर्वस्त्रीणां सैव धन्या न चान्या॥

— 62 —

**FRENCH PROVERB—**

Hope is the dream of a man awake.

आशा पुंसामसुप्तानां स्वप्न एवेति गद्यते।

— 63 —

**SENECA—**

Who can hope for nothing should despair of nothing.

आशैव चेतसि पदं कुरुते न यस्य
जायेत नैव स कदापि नरो निराशः।

OR

............न ह्यनाशो नैराश्यमुपगच्छति।

— 64 —

EPICTETUS—

It is the part of a wise man to resist pleasures, but of a foolish one to be a slave to them.

इन्द्रियाणां वशे मूर्खो वशे सुज्ञस्य तानि तु ।

— 65 —

STEEL—

Men spend their lives in the service of their passions instead of employing their passions in the service of their lives.

इन्द्रियोपसेवने योजयन्ति जीवितं
जीवितोपसेवने नेन्द्रियाणि मानवाः ।

— 66 —

COLTON—

Men are born with two eyes, but with one tongue, in order that they should see twice as much as they say.

ईक्षणं द्विगुणं भूयाद्भाषणस्येति वेधसा ।
द्वे चक्षुषी मनुष्याणां जिह्वा त्वेकैव निर्मिता ॥

— 67 —

PUBLIUS SYRUS—

The eyes don't err if the mind governs them.

ईशाने मनसि प्रमाद्यति कथं चक्षुर्द्वयं तद्वशम् ।

— 68 —

LA ROCHE—

People are not so liberal with anything as with advice.

उपदेशस्य दाने या दृश्यते समुदारता ।
सालोक्यते नृणां प्रायो नेतरत्र कदाचन ॥

— 69 —

SOLON—

Reprove thy friend privately; commend him publicly.

उपांशु गर्हा सुहृदि प्रयोज्या
श्लाघा पुनर्लोकसमक्षमेव ।

— 70 —

STERNE—

There is no cause why one man's nose is longer than another's but because that God pleases to have it so.

एकस्य नासिकाया दीर्घतरान्यस्य किमितिचेद्ब्रूमः ।
न ह्यत्र कोऽपि हेतुः केवलमिच्छा बलीयसी धातुः ॥

— 71 —

BP. PORTEOUS—

One murder made a villain, millions a hero.

एकं निघ्नन् विन्दते घातकाख्यां
कोटीर्निघ्नन् वीरतां याति लोके ।

— 72 —

GERMAN PROVERB—

A penny by right is better than a thousand by wrong.

एकः काणवराटोऽपि धर्मेणाधिगतो वरम् ।
न त्वधर्मेण संप्राप्ताः सहस्रमपि रूपकाः ॥

— 73 —

LESSING—

Some people obtain fame, but others deserve it.

एके कीर्तिमुपार्जन्ति तामर्हन्त्यन्य एव तु ।

— 74 —

GERMAN PROVERB—

Many see more with one eye than others with two.

एकैर्द्वाभ्यामीक्ष्यते यत्ततोऽपि
पश्यन्त्यन्ये चक्षुषैकेन भूयः ।

— 75 —

OOTVOS—

Not he who has many ideas but he who has one coviction may become a great man.

एकोऽपि भावोऽस्तु दृढं प्रतीतः
कल्पा अनेके न हि गौरवाय ।

— 76 —

WM. PENN

Frugality is good, if liberality be joined with it.

औदार्यसंयुतं चेन्मितव्ययत्वं प्रशस्यते पुंसाम् ।

— 77 —

KLINGER—

Only he who really bears the burden knows its weight

कथं भारमबिभ्राणो जानीयात्तस्य गौरवम् ।

— 78 —

LORD CHESTERFIELD—

Whatever is worth doing at all is worth doing well.

कर्तव्यमेव यन्नाम सम्यक्कर्तव्यमेव तत् ।

— 79 —

RUSKIN—

The best work never was, nor ever will be, done for money at all.

कर्म प्रशस्तं सुतरां कदापि
धनाय नाकारि करिष्यते वा।

— 80 —

कलङ्को न स्फुटं दृश्यो मलिने वसने स्थितः।
विमले तु सुलक्ष्योऽसौ मर्म जानातु पण्डितः।

— 81 —

CICERO—

We are born poets, we become orators.

कवित्वं जन्मनास्माकं वाग्मिताभ्यासयोगतः।

— 82 —

THOMAS A KEMPIS—

No man is so sufficient as never to need assistance.

कस्य साधनसम्पत्तेः पर्याप्तिरियती भवेत्।
यत्साहाय्यं न कस्यापि व्यपेक्षेत कदाचन॥

— 83 —

ROWE—

The joys of meeting pay the pangs of absence; else who could bear it?

कः सहेत विरहस्य वेदनां
संगमोऽस्य फलमस्ति नो यदि।

— 84 —

RUSKIN—

There are many religions, but there is only one morality.

कामं धर्मा बहवो नीतिस्त्वेकैव सर्वत्र।

— 85 —

ANONIMOUS—

Men have many faults;
Poor women have but two;
Ther's nothing good they say,
And nothing right they do.

कामं पुमांसो बहुदोषभाजः
स्त्रीणां तु दोषद्वयमेव दृश्यम् ।
वचस्तदुक्तं न च साधु किंचित्
क्रियोचिता कापि न तत्कृता च ॥

— 86 —

SWIFT—

In men desire begets love, and in women love begets desire.

कामः प्रीतिं जनयति पुंसु
प्रीतिः कामं पुनरबलासु ।

— 87 —

SHAKESPEARE—

Lawless are they that make their wills their law.

कामो धर्मायते येषां धर्मभ्रष्टास्त एव हि ।

— 88 —

ENGHISH PROVERB—

Remove the cause and the effect will cease.

कारणेऽपहृते कार्यं स्वयमेवोपरंस्यति ।

— 89 —

ENGLISH PROVERB—

Many hands make light work.

कार्यं सुकरतां याति बहुभिर्मेलकैः कृतम् ।

— 90 —

SOCRATES—

The envious man waxeth lean with the fulness of his neighbours.

कार्श्यं पुष्यति मत्सरी बत परं पुष्ट्यान्तिके तिष्ठताम् ।

— 91 —

PROF. BLACKIE—

Disorder makes nothing at all, but unmakes every thing.

किमपि न घटयति कार्यं व्यत्यासः सर्वमेव विघटयति ।

— 92 —

HUME—

Nothing is more surprising than the easiness with which the many are governed by the few.

किमप्यद्भुतं नान्यदस्मादिहास्ति
यदल्पे बहूँल्लीलया शासतीति ।

— 93 —

LACTANTIUS—

The first point of wisdom is to discern that which is false. The second to know that which is true.

किं मिथ्येति परिच्छेदः प्रज्ञाया विषयोऽग्रिमः ।
किं सत्यमिति च ज्ञानं द्वितीयः प्रोच्यते बुधैः ॥

— 94 —

ENGLISH PROVERB—

No noble task was ever easy

किं सत्कर्म भवेत्कदापि सुकरं दुष्कर्म वा दुष्करम् ।

— 95 —

किं सद्वृत्तस्य वित्तेन वित्ताद्वृत्तं विशिष्यते

— 96 —

JUVENAL—

Not easily do those attain to distinction whose abilities are cramped by domestic poverty.

कुटुम्बचिन्ताकुलमानसानां
प्रायः प्रतिष्ठा सुलभा न पुंसाम् ।

— 97 —

MARATHI PROVERB—

कुऱ्हाडीचा दांडा गोतास काळ.

कुठारदण्डः स्वकुलस्य नाशनः ।

OR

कुठारदण्डस्तरुषण्डखण्डनं
स्वयं विधत्ते किल तारवोऽपि सन् ।

— 98 —

HORACE—

Do good by stealth and blush to find it fame.

कुर्वन् परहितं गूढश्चोरवत्सुजनो भवेत् ।
तदुत्थां कीर्तिमाकर्ण्य जिंह्रीयाज्जनसंसदि ॥

— 99 —

VOLTAIRE—

Fear follows crime and is its punishment.

कृतागसं भीर्नजहाति जात्वपि
दण्डोऽपरः को नु सदाभयस्य च ।

— 100 —

WHITTIER—

Speak out in acts, the time for words has passed, and deeds alone suffice.

कृतिरूपं वचो ब्रूत कालो हि वचसो गतः।
सुपर्याप्ता भवन्त्यत्र कृतयः किल केवलम् ॥

— 101 —

BYRON—

Man is
Born to be ploughed with years, and sown with cares,
And reaped by death, lord of the human soul.

कृष्यं वासरसीरैः क्षेत्रं कालेन देहसंज्ञमिदम्।
चिन्ताबीजान्युप्त्वा पर्यन्ते फलभुजापि भवितव्यम्।

— 102 —

COLTON—

We hate some people because we do not know them, and we will not know them because we hate them.

केचिन्नो द्वेष्यतां यान्ति यतो विद्मो न तान्वयम्।
न च वेदितुमिच्छामो यतोऽमी द्वेष्यतां गताः ॥

— 103 —

OVID—

To the brave man every land is his native land.

को नाम वीरस्य निजो न देशः।

— 104 —

CHARLES FREDERIC GOSS—

Anger manifests itself in blows, amusement in smiles, sorrow in tears, and love in kisses.

कोपः परुषया वाचा शोको नयनवारिणा।
स्मितैः प्रकटतां याति केलिः प्रीतिश्च चुम्बनैः।

— 105 —

BODENSTEDT—

The end of anger is the beginning of repentence.

...........क्रोधे विरते प्रवर्ततेऽनुशयः

— 106 —

LAW—

The beaten path is the safe path.

क्षुण्णः क्षेमकरः पन्था अक्षुण्णस्तु भयावहः

— 107 —

GERMAN PROVERB—

Poverty and hunger have many learned desciples.

क्षुधे देवि नमस्तुभ्यं नमस्तुभ्यं दरिद्रते।
उभयोरपि वां शिष्या विद्वांसो बहवो भुवि॥

— 108 —

MARATHI PROVERB—

खाऊन माजावें, टाकून माजूं नये.

खादन्नं भजेत्पुष्टिं न त्यजन्भदमत्तताम्।

— 109 —

PRIOR—

Who fastest walks, but walks astray,
Is only farthest from the way.

गच्छन्तोऽपि द्रुततरपदं हा भजन्त्युत्पथं चेत् ।
स्वीयान्मार्गात्समधिकतरं दूरमेव प्रयान्ति ॥

— 110 —

KEBLE—

When the shore is won at last
Who will count the billows past

गण्याः कस्य महोर्मयो व्यतिगतास्तीरे समासादिते ।

— 111 —

MARATHI PROVERB—

वराती पाठीमागून घोडें कशास ?

गतायां वरयात्रायां किमानीतेन वाजिना ।

— 112 —

BRACTON—

The king is greater than each singly, but less than all unitedly.

गरीयानखिलेभ्योऽपि व्यस्तेभ्योऽस्ति पृथक् पृथक् ।
लघीयान् संहतेभ्यस्तु जनेभ्यो धरणीपतिः ॥

— 113 —

MARATHI PROVERB—

उथळ पाण्याला खळाळी फार.

गाधं सलिलं सुतरां स्खलति
प्रस्तरविहतं नितरां नदति ।

— 114 —

LONGFELLOW—

Music is the universal language of mankind.

गीतं गीः सर्वसामान्या सर्वमानसहारिणी ।

— 115 —

LA ROCHE—

We do not despise all those who have vices, but we despise all those who have no virtue.

गुणशून्यास्तिरस्कार्या न सर्वे दुर्गुणान्विताः ।

— 116 —

BODENSTEDT—

At the bottom of the faith-sea lies the pearl of knowledge; happy the diver that finds it.

गुरुभक्तिपयोनिधेरगाधे
तल आस्ते खलु मौक्तिकं निगूढम् ।
उपलिप्सुरिदं च संविदाख्यं
विरलो मज्जति कोऽपि तत्र धन्यः ॥

OR

श्रद्धाम्भोधेस्तलेऽगाधे निगूढं ज्ञानमौक्तिकम् ।
विरलः कोऽपि धन्यस्तल्लभते तत्र मज्जनात् ॥

— 117 —

SHAKESPEARE—

Rich gifts wax poor when givers prove unkind.

गुर्वपि दानं लघुतां पुष्यति
दाता चेत् सावज्ञं यच्छति ।

— 118 —

SHAKESPEARE—

What's in a name? That which we call a rose,
By any other name would smell as sweet.

'गुलाब'संज्ञं कुसुमं यदुच्यते
तदन्यनाम्ना यदि वाभिधीयते।
न सौरभं तस्य कदापि हीयते
न नाम वस्त्वेव जनैर्महीयते॥

— 119 —

SCHILLER—

A deep meaning often lies in old customs.

गूढार्थाः प्रायशः सन्ति पुराणा जनरूढयः।

— 120 —

LABER—

To accept favour is to forfeit liberty.

गृह्णन्ननुग्रहं स्वस्मात् स्वातन्त्र्यात् परिहीयते।

— 121 —

MARATHI PROVERB—

दुभत्या गाईच्या लाथा गोड.

गोर्दुग्धदायाः किल दोहकाले
लत्ताप्रहारोऽपि सुखाकरोति।

— 122 —

TACITUS—

Respect is greater at a distance.

गौरवं गुरुतां धत्ते दूर एव गरीयसीम्।

— 123 —

AMIEL—

He who ceases to grow greater grows smaller.

गौरवोपचयतो विरतो यः
स क्रमेण लघुतामुपयाति।

— 124 —

**MARATHI PROVERB—**

जेवीन तर तुपाशीं नाहीं तर उपाशी.

घृतेन भोजनं कुर्यां नोचेत्स्थास्याम्युपोषिता।

— 125 —

**TUPPER—**

Love looketh from the eye, and kindleth love by looking.

चक्षुर्गवाक्षात्प्रणयो हृदिस्थः
संवीक्षमाणः प्रणयं समिन्द्धे।

— 126 —

**SHAKESPEARE—**

It ( learning ) adds a precious seeing to the eye.

चक्षुषि दृष्टिं वितरति कामपि विद्या स्वधीता चेत्।

— 127 —

**BROHSTERN—**

A steady eye and a lofty mind are at all times good.

चक्षुः स्थिरं मानसमुन्नतं च
सर्वेषु कार्येषु हिताय नृणाम्।

— 128 —

**CORNEILLE—**

When love is satisfied all the charm of it is gone.

चित्तजे किल कृतार्थतां गते
सर्व एव लयमेति तद्रसः।

— 129 —

MARATHI PROVERB—

चोराच्या मनांत चांदिणें.

चित्ते चोरस्य चन्द्रिका ।

OR

चरतो निशि चोरस्य चित्तं तुदति चन्द्रिका ।

— 130 —

FRENCH PROVERB—

Think much, speak little, write less.

चिन्तय चित्तेऽनल्पं वद वाचाल्पं लिखाल्पतरमेव ।

— 131 —

VOLTAIRE—

Providence has given us hope and sleep as a compensation for the many cares of life.

चिन्ताशतं वितरता चतुराननेन
निद्रा सुखाय निरमाय्यपरा तथाशा ।

— 132 —

MENANDER—

The anger of lovers does not last long.

चिरस्थायी कोपः प्रणय कुपितानां न भवति ।

— 133 —

BENJAMIN FRANKLIN—

Plough deep while sluggards sleep.

चिरं स्वपितु तन्द्रिलः कुरु हलक्रियां यत्नतः ।

— 133 —

LEIGH HUNT—

Stolen kisses are always the sweetest.

चुम्बितानि मुषितानि कामपि
माधुरीं प्रवितरन्ति सन्ततम् ।

— 135 —

**BLAIR—**

Whatever purifies the heart; fortifies it.

चेतसो यत्पूतये । कल्पते तद्दृढये ॥

— 136 —

**ENGLISH PROVERB—**

Set a thief to catch a thief.

चोर एव नियोक्तव्यश्चोरग्रहणकर्मणि ।

— 137 —

**MARATHI PROVERB—**

ओळखीचा चोर जिवानिशीं सोडीना.

चोरः परिचितः प्राप्य जीवन्तं त्वां न मुञ्चति ।

— 138 —

**YOUNG—**

What is this world? Thy school, O misery!

जगती पाठशालेयं दुर्गते तव राजते ।

— 139 —

**RABELAIS—**

One half of the world knows not how the other half lives.

जगतोऽर्धं न जानाति जीवत्यन्यत्कथं न्विति ।

— 140 —

**PASCAL—**

Do you wish men to speak well of you?
Then never speak well of yourself.

जनकृतं स्तवमात्मन ईप्सता
पटुधिया क्रियतां न निजस्तवः ।

— 141 —

**COLTON—**

If men praise your efforts, suspect their judgment; if they censure them, your own.

जनैःस्तूयसे चेत्तदा ते विशङ्क्या
जनैर्निन्द्यसे चेत्स्वयं त्वं विशङ्क्यः ।

— 142 —

**SHAKESPEARE —**

Some are born great, some achieve greatness and some have greatness thrust upon them.

जन्मना जायते गौरवं कस्यचित्
केनचित्कर्मणा प्राप्यते गौरवम् ।
जन्मकर्मादिनानर्ह एवापि सन्
हा कथं गौरवं कश्चिदारोप्यते ॥

— 143 —

**AN INDIAN PATRIOT —**

जन्मना भारतीयोऽस्मि भारतीयश्च कर्मणा
मरणे भारतीयः स्यां भारतीयः पुनर्भवे ॥

— 144 —

**ROCHEFOUCAULT—**

The defects of the mind like those of the body, grow worse as we grow old.

जरया सह वर्धते नृणां
विकलत्वं मनसस्तनोरिव ।

— 145 —

**F. LEONARD—**

Though wrong may win, its victory is brief.

जितवतोऽप्यनयस्य जयोऽस्थिरः ।

— 146 —

SIR P. SIDNEY—

Commonly they use their feet for defence whose tongue is their weapon.

जिह्वाशस्त्राः प्रायशः पादयुग्मं
रक्षाहेतोरात्मनः संश्रयन्ते ।

— 147 —

जीवनार्थं धनं विन्देत्ततो जीवेत्तदुत्सृजन् ।
न वित्तं तत्त्वतो वित्तं पात्रे दत्तं चेदिदम् ॥

— 148 —

NABLE—

Ther's not so much danger.
In a known foe as a suspected friend.

ज्ञातो रिपुर्नास्ति भयावहस्तथा
यथा जनानां किल शङ्कितः सुहृत् ।

— 149 —

RUSKIN—

Keep what you want, cast what you can, and expect nothing back once lost or once given.

तत्संग्राह्यं येन कार्यं भवेत्ते
तत्ते त्याज्यं शक्यते यद्विहातुम् ।
यन्नष्टं वा यत्प्रदत्तं सकृद्वा
तस्य प्राप्तिर्जातु नापेक्षणीया ॥

— 150 —

MONVEL—

We wish to have what we have not and what we have ceases to please.

तद्द्रव्यं लब्धुमिच्छामो यदस्माकं न विद्यते ।
विद्यते च यदस्माकं तद्वैरस्याय कल्पते ॥

— 151 —

**FRENCH PROVERB—**

A tiny spark shines in the dark.

तन्वपि तेजस्तमसि चकास्ति ।

— 152 —

**SHAKESPEARE—**

Upon thy cheek lay I this zelous kiss,
as seal to the indenture of my love.

तव हृदि प्रणयो निहितो मया
न स कदाप्यपयातु ततो बहिः ।
इति मुखं सरसं परिचुम्बता
स्वकृतयेव वृतं सखि मुद्रया ॥

— 153 —

**DANISH PROVERB—**

No man is so tall that he need never stretch, nor so small that he need never stoop.

तुङ्गोऽपि लम्बेत न नो कदाचित्
खर्वोऽपि सर्वो न नमेन्न जातु ।

— 154 —

**PORT. PROVERB—**

He is the world's master who despises it, its slave who prizes it.

तुच्छो यस्याखिलो लोकः स लोकस्य पतिर्मतः ।
लोको बहु मतो यस्य स दासस्तस्य गण्यताम् ।

— 155 —

**PASQUIER QUESNAL—**

Truth irritates only those whom it enlightens, but does not convert.

तेषामेव प्रकोपाय सत्यमुक्तं प्रकल्पते ।
हृदि बोधरविर्येषामुदितो न तमो हरेत् ॥

— 156 —

**ENGLISH PROVERB—**

Measure three times before you cut once.

त्रिरादौ मिमीध्वं सकृच्छेत्स्यमानम् ।

— 157 —

**SHAKESPEARE—**

Reason thus with life;
If I do lose thee, I do lose a thing
That none but fools would keep: a breath thou art,
(Servile to all the skiey influences,)
That dost this habitation, where thou keep'st,
Hourly afflict.

त्वया नष्टेन किं नष्टं वद जीवित मामकम् ।
त्वं श्वासमयमेवासि संरक्ष्यं मन्दबुद्धिभिः ॥
पञ्चभूतात्मक गेहं यदिदं संश्रितं त्वया ।
तस्यैवानुदिनं पीडां विदधासि कृतघ्नवत् ॥

— 158 —

**ALFIERI—**

It is not the punishment, but the crime that is the disgrace.

दण्डनेन लघुता न दोषिणो
दोष एव किल मानहानये ।

— 159 —

**ENGLISH PROVERB—**

Pay what you owe, and what you are worth you'ill know.

दत्त्वान्यस्मै यद्देयं
ज्ञास्यसि पश्चात्किं स्वीयम् ।

— 160 —

MARATHI PROVERB—

दांत आहेत तर चणे नाहींत, चणे आहेत तर दांत नाहींत.

दन्तेषु सत्सु चणका बहुशो न लभ्या
दन्ता न सन्ति तु नृणां चणकेषु सत्सु ।

— 161 —

SHAKESPEARE—

Mercy but murders, pardoning those that kill.

दयापि किल सा हिंस्रा क्षमते हिंसतोऽपि या ।

SCOTCH PROVERB—

Giving to the poor increases man's store.

दानमुत्सृजतः पात्रे निधानमुपचीयते ।

— 163 —

ADDISON—( on music ).

All of heaven we have below

दिव्यं यत्किमपीह मर्त्यभुवि सा गन्धर्वविद्या न किम् ।

— 164 —

DIDEROT—

Give, but if possible, spare the poor man the shame of holding out the hand.

दीनाय देहि धनमात्मकरं प्रसार्य
पाणिप्रसारणकृतां न स यातु लज्जाम् ।

— 165 —

CERVANTES —

Proverbs are short sentences drawn from long experience.

दीर्घानुभवसमुद्भूतमाभाणकसंज्ञकं वचो लघु यत् ।

— 166 —

ENGLISH PROVERB—

Pain past is pleasure

दुःखमतीतं सुखतां याति ।

— 167 —

SHAKESPEARE—

Ill deeds are doubled with an evil word.

दुष्टत्वं दुष्कृतेर्याति द्वैगुण्यं दुष्टया गिरा ।

— 168 —

PUBLIUS SYRUS—

He does injury to the good who spares the bad.

दुष्टानदण्डयन् राजा मन्येऽपकुरुते सताम्

— 169 —

SPANISH PROVERB—

Vice is learned without a schoolmaster.

दुर्गुणाः परिशील्यन्ते साहाय्येन विना गुरोः ।

— 170 —

OVID—

The burden which is well borne becomes light.

दुर्वहोऽपि यदि सम्यगुह्यते
भार एति सुखवाह्यतां नृणाम् ।

— 171 —

MONTESQUIEU—

What the orators want in depth, they give you in length.

दैर्घ्येण कुरुते वक्ता गाम्भीर्याभावनिह्नवम् ।

OR

दैर्घ्येण च्छाद्यते वक्त्रा वाचां गाम्भीर्यहीनता ।

— 172 —

ROUSSEAU—

Whoever blushes confesses guilt; true innocence feels no shame.

दोषं व्रीडा प्रकटयति
नादोषो ह्रियमुपयाति ।

— 173 —

JUVENAL—

Many commit the same crime with a very different result. One bears a cross for his crime, another a crown.

द्वयोस्तुल्यापराधत्वे दृश्यते फलभिन्नता ।
शूलमारोप्यते ह्येकः सिंहासनमथापरः ॥

— 174 —

J. ROUX—

Two sorts of writers possess genius, those who think, and those who cause others to think.

द्विविधौ ग्रन्थकर्तारौ प्रतिभाशालिनौ स्मृतौ ।
स्वयं विचारयेद्यो वा विचारेऽन्यान्प्रवर्तयेत् ॥

— 175 —

TALMUD—

Commit a sin twice, and it will not seem to be a crime.

द्विः पापं कुर्वतः पुंसो न पापे पापभावना ।

— 176 —

ENGLISH PROVERB—

He who follows two hares is sure to catch neither.

द्वौ शशकावनुधावन्नूनं गृह्णाति नैकमपि ।

— 177 —

ENGLISH PROVERB—

Shame of poverty is almost as bad as pride of wealth.

धनदर्प इव प्रायो दैन्यलज्जापि नोचिता ।

— 178 —

धनलुब्धैर्धनवन्तः
प्रायो भुवि परवन्तः ।

— 179 —

GOETHE—

Nobody should be rich but those who understand it.

धनवता पुरुषेण न भाव्यं
यदि न वेद स किं धनवत्त्वम् ।

— 180 —

OLD SONG—

'Tis a very good world that we live in,
To lend, or to spend, or to give in;
But to beg or to borrow, or to get man's own,
'Tis the very worst world that ever was known.

धनं दातुं भोक्तुं भवतु विपुलं सद्मनि मम
ततोऽहं संसारं परमरुचिरं नाम कलये ।
उपादेयं याच्यं यदि तु वसु मे स्वोदरकृते
न जानेऽस्मादन्यत्किमधिकतरं दुःखदमिति ॥

— 181 —

JOHN FORD

O, happy kings,
Whose thrones are raised in their subjects' heart.

धन्यास्ते नरपतयो जनहृदि सिंहासनं स्थितं येषाम् ।

OR

धन्याः केऽपि नृपाला जनहृत्सिंहासनाधिरूढा ये ।

— 182 —

**TUKARAMA—**

धिक् जिणें तो बाईले अधीन।

धिग्जीवितं दारवशंवदस्य।

— 183 —

धिया निवार्याभिभवोन्मुखी चेत्-
धैर्येण धार्या विपदापतन्ती।

— 184 —

**SWIFT—**

A wise man should have money in his head, but not in his heart.

धीधनेन सुधिया भवितव्यं
हन्त हा धनधिया न कदापि।

— 185 —

**MOTTO—**

Not to educe smoke from splendour, but light from smoke.

धूमादग्निर्जायमानः प्रशस्यो
वह्नेर्धूमो जायमानस्तु निन्द्यः।

— 186 —

**ENGLILH PROBERB—**

He that hinders not a mischief is guilty of it.

न केवलं प्रयुञ्जानः परेष्वपकृतिं स्वयम्।
क्रियमाणामरुन्धानोऽप्यन्यैर्भवति दोषभाक् ॥

— 187 —

SHAKESPEARE—

I am not covetous for gold;
But if it be a sin to covet honour,
I am the most offending soul alive.

न काञ्चने कश्चन मेऽभिलाषो
माने तु नित्यं रमते मतिर्मे ।
पापाय चेन्मानरतिर्नराणां
न मादृशः कोऽपि भुवीह पापी ॥

— 188 —

ADDISON.—

Modesty is not only an ornament, but also a guard to virtue

न केवलं भूषण एव रक्षणे
गुणस्य नूनं विनयः प्रवर्तते ।

— 189 —

THOMAS A KEMPIS—

No man is without his load of trouble.

न कोऽपि लोकेऽस्ति न यो बिभर्ति
सुदुर्वहं दुःखभरं स्वकीयम् ।

— 190 —

DR. FRANK CRANE—

No man can die until god is ready for him.

न कोऽपि शक्तो यमधाम गन्तुं
यावद्यमो नोद्यत एव नेतुम् ।

— 191 —

BEN JONSON—

No man can be a good poet without first being a good man.

न कोऽपि सुकविर्भवेत् सुजनतामगत्वादितः ।

— 192 —

**SALL—**

Neiher armies not treasures are the safeguards of a state, but friends.

न कोशो न दण्डस्तथा रक्षणाय
नृपाणां विपत्तौ यथा मित्रवर्गः ।

— 193 —

**ENGLISH PROVERB—**

No man is born wise or learned.

न जन्मनः कोऽपि बुधो न विद्वान् ।

— 194 —

**CHARRON—**

He who receives a good turn, should never forget it; he who does one should never remember it.

न जातु विस्मरेदन्यैरात्मन्युपकृतिं कृताम् ।
शतमप्युपकाराणां न स्मरेत् कृतमात्मना ॥

— 195 —

**MARTIAL—**

Not to live but to be healthy is life.

न जीवतीत्येव नरः सजीवः
किं जीवितेनामयसंकुलेन ।

OR

यज्जीवतोऽनामयता नरस्य
सदेव तज्जीवितमामनन्ति ।

— 196 —

**LAVATER**—

He who has not forgiven an enemy has never yet tasted one of the most sublime enjoyments of life.

न तेन भुक्तं सुखमत्युदात्तं
क्षान्तं रिपोर्दुश्चरितं न येन ।

— 197 —

**CONFUCIUS**—

Reckon no vice so small that you may commit it, and no virtue so small that you may overlook it.

न दोषो वा गुणो वापि कोऽपि क्षुद्रतरस्तथा ।
यथा संसेव्य एकः स्यात् समुपेक्ष्योऽथ वापरः ॥

— 198 —

**ITALIAN PROVERB**—

Poor people have no relations.

न निर्धनानामिह केऽपि बन्धवः ।

— 199 —

**DUTCH PROVERB**—

No corn without chaff.

न निस्तुषं धान्यमिहास्ति किंचित् ।

— 200 —

**QUARLES**—

The fruit that's yellow
Is found not always mellow.

न पीतानीति पक्वानि फलानि निखिलान्यपि ।

— 201 —

**NAPOLEON**—

It is the cause, not the death, that makes the martyr.

न पुंसो जीवितत्यागात्–गौरवं त्यागकारणात् ।

— 202 —

SWIFT—

Power is no blessing in itself, but when it is employd to protect the innocent.

न बलं बलिनां विभूषण—
मवनायास्ति न चेदनागसाम् ।

— 203 —

ENGLISH PROVERB—

Perseverance performs greater works than strength.

न बलेन गरीयसी क्रिया
व्यवसायेन यथा प्रसिध्यति ।

— 204 —

HENRY HOME—

A great mind will neither give an affront nor bear it.

न महान् निकृतिं कुरुते कदापि न च तां स्वयं सहते ।

— 205 —

CICERO ( of moderation )—

To live long it is necessary to live slowly.

न मन्दमचलंश्चिरं चलति जीविताख्येऽध्वनि ।

— 206 —

GARFIELD—

The dead do not need us, but for ever and evermore we need them.

न मृता अर्थिनोऽस्माभिस्तैर्वयं तु सदार्थिनः ।

— 207 —

ARIST—

The aim of a wise man is not to secure pleasure, but to avoid pain.

न सुधीः सुखलाभाय घटते दुःखहानये ।

— 208 —

RIVAROL—

It has been very truly said that the mob has many heads, but no brains.

न स्वल्पमपि मस्तिष्कं मस्तकेषु बहुष्वपि
जनतामधिकृत्येदं यदुक्तं सत्यमेव तत् ॥

— 209 —

MARATHI PROVRRB—

एका म्यान्यांत दोन सुऱ्या रहात नाहींत.

न हि खड्गद्वयं जातु कोशमेकं निषेवते ।

— 210 —

GOETHE—

It is a great mistake for people to think themselves more than they are, and to value themselves less than they are worth.

नात्मानं बहु मन्येत नावमन्येत वा तथा ।

— 211 —

LUTHER—

How soon "not now" becomes "never."

नाधुनेति नकदापितामिह
हन्त हन्त कियदाशु गच्छति ।

— 212 —

**SENECA—**

No evil is without its compensation.

नानर्थो विद्यते कोऽपि निष्कृतिर्यस्य नोचिता ।

— 213 —

**PHÆD—**

Let the ear despise nothing, nor yet be too ready to believe.

नानाकर्ण्यं कर्णयुग्मेन किंचित्-
न श्रद्धेयं सर्वमाकर्णितं तु ।

— 214 —

**EMERSON—**

There is no true orator who is not a here.

नाशूरस्तत्त्वतो वाग्मी .... .... ।

— 215 —

**WORDSWORTH—**

The flower of sweetest smell is shy and lowly.

नितान्तमधुरामोदं सलज्जं विनतं सुमम् ।

— 216 —

**SOCRATES—**

Slanderers do not hurt me, because they do not hit me.

निन्दन्तोऽपि न भिन्दन्ति यतो मर्माणि मे हृदः ।
वाग्बाणैर्नापकुर्वन्ति पिशुना मे मनागपि ॥

— 217 —

**TACITUS—**

When men are full of envy, they disparage everything, whether it be good or bad.

निन्द्यते मत्सरग्रस्तैः सदसच्चाविशेषतः ।

— 218 —

AUGHEY—

God brings men into deep waters, not to drown them, but to cleanse them.

निपातयति देवोऽस्मानगाधे विपदम्बुधौ ।
न निमज्जयितुं मन्ये प्रमार्जयितुमेवतु ॥

— 219 —

DUTCH PROVERB—

Good leading makes good following.

निपुणो यदि नेता स्यान्निपुणा अनुयायिनः ।

— 220 —

SHAKESPEARE.

Poor and content is rich and rich enough.

निर्धनोऽपि धनवान् परितुष्टो
निर्धनश्च सधनोऽपि वितुष्टः ।

— 221 —

SHAKESPEARE—

When rich villains have need of poor ones,
Poor ones may make what price they will.

निर्धनैरर्थिनः सन्ति सधना दुर्जना यदा ।
दौर्जन्यादधनास्तेभ्यो लिप्सन्तेऽर्थं यथारुचि ॥

— 222 —

BACON.

Houses are built to live in and not to look on.

निर्मीयते निवासाय नालोकाय निकेतनम् ।

OR

वेश्मानि वासाय न दर्शनाय ।

— 223 —

ENGLISH PROVRB—

The house that is abuilding looks not as the house that is built.

निर्मीयमाणं भवनं कदाचि-
च्छोभां हरेन्नैव विनिर्मितस्य ।

— 224 —

JOUBERT—

Revenge is the abject pleasure of an abject mind.

निर्यातनं यन्निकृतेस्तदुच्यते
क्षुद्रं सुखं क्षुद्रधियाभिवाञ्छितम् ।

— 225 —

CONFUCIUS—

He is the truly courageous man who never desponds.

निर्विद्यते यो न कुतोऽपि हेतोः
स धैर्यवांस्तत्त्वत एव लोके ।

— 226 —

निर्वृतं मनो वपुरनामयं
कुरु हृदन्तरं मम दयामयम् ।
श्रीपते रतिर्नास्ति मे धने
नान्यतोऽपि वा सौख्यसाधने ॥

— 227 —

GEORGE ELIOT—

Our deeds dertermine us as much as we determine our deeds.

निश्चिन्वंश्चरितं निजं भुवि नरस्तेनापि निश्चीयते ।

— 228 —

**BACON** ( of moderation )—

All the operations of Nature are gradual.

निसर्गस्य क्रियाः सर्वाः प्रवर्तन्ते शनैः शनैः ।

— 229 —

**PASCAL**—

Justice without power is inefficient; power without justice is tyrannay.

नीतिमान् शक्तिहीनश्चेन्न स कार्यक्षमो भवेत् ।
शक्तिमान्नीतिहीनस्तु भवेल्लोकप्रपीडकः ॥

— 230 —

**TALMUD**—

Throw no stones into the well whence you have drunk.

नीरं यस्माद्रे त्वया प्राशि भूय-
स्तस्मिन् कूपे नोपलाः क्षेपणीयाः ।

— 231 —

**GERMAN PROVERB**—

Princes have long hands and many ears.

नृपाणां कर्णबाहुल्यं करदैर्घ्यं तथैव च ।

— 232 —

**LEIGH HUNT**—

No wonder is greater than any other wonder, and if once explained it ceases to be a wonder.

नैकमाश्चर्यमन्यस्माद्गरीयोऽस्ति कदाचन ।
विवृतं सकृदेतच्चेदेतस्याश्चर्यता कुतः ॥

— 233 —

**SHAKESPEARE**—

Give thy thoughts no tongue,
Nor any unproportioned thought his act.

नो जिह्वाविषयत्वमेतु तव यच्चिते स्थितं पुत्रक।
यद्वा नो सुविचारितं न हि तथा तत्कर्मणाचर्यताम् ॥

— 234 —

**MARATHI PROVERB**—

गाड्यावर नाव, नावेवर गाडा.

नौः शकटे शकटं नावि
स्थलजलवशतो निधीयते।

— 235 —

**PLAUTUS**—

Vulgarity in manners defiles fine garments more than mud.

पङ्कस्तथा न वसने मलिनयति यथा ह्यसभ्यता रीतेः।

— 236 —

पङ्के यो न सुगन्धः स पङ्कजे दृश्यते मनोहारी।
अनलं शमयति सलिलं जनकादपि तेजसाधिको जन्यः॥

— 237 —

**LOWELL**—

Mishaps are like knives, that either serve us or cut us, as we grasp them by the blade or by the handle.

पत्रे धृतापायकरी छुरी स्यात्
त्सरौ धृता तूपकृतिं करोति।
विपन्निहन्यात् खलु दुर्गृहीता
धृता तु धैर्येण हितं विदध्यात्॥

— 238 —

MARATHI PROVERB—

आयत्या बिळीं नागोबा बळी.

परकृते बिले पन्नगो बली ।

— 239 —

SHAKESPEARE—

The ripest fruit first falls,

परिणतं सुतरां बत यत्फलं
पतति तत्प्रथमं धरणीतले ।

— 240 —

GLADSTONE—

Until men have learned industry economy and self-control they cannot be safely intrusted with wealth.

परिशीलयन्ति यावन्नोद्यमपरतां नरा मितव्ययताम् ।
इन्द्रियसंयमितामपि तावन्नार्हन्ति रक्षितुं लक्ष्मीम् ॥

— 241 —

CICERO—

Wars sholud be undertaken in order that we may live in peace without suffering wrong.

परैर्मा निकृता भूम शान्तिभाजो भवाम च ।
इत्येवाश्रयणीयानि काले युद्धानि नान्यथा ॥

— 242 —

WARD BEECHER—

Compassion will cure more sins than condemnation.

पापापनोदने हेतुर्नानुकम्पेव गर्हणा ।

— 243 —

**SHAKESPEARE—**

Who steals my purse, steals trash; 'tis something, nothing;
'Twas mine, 'tis his, and has been slave to thousands,
But he that filches from me my good name,
Robs me of that which not enriches him,
And makes me poor indeed.

पुरा या बहूनां वशे वर्तते स्म
कियन्तं च कालं मदीये गृहेऽभूत् ।
हृता चेद्बलात्तस्करैः साद्य लक्ष्मी-
रहो तत्त्वतः का ममास्त्यत्र हानिः ॥
मदीयं पुनर्निर्मलं कीर्तिरूपं
धनं यो हरेत्तस्य कस्तेन लाभः ।
यतो वित्तवांस्तेन वित्तेन नासौ
बताहं तु नूनं दरिद्रो भवामि ॥

— 244 —

**HIPPEL—**

Men look for what people think of them, women to what they say.

पुंसां जनमते दृष्टिः स्त्रीणां दृष्टिर्जनोक्तिषु ।

— 245 —

**COLTON—**

There are three difficulties in authorship–to write any thing worth the publishing, to find honest men to publish it and to get sensible men to read it.

प्रकाशनार्हं किल किं विरच्यं
प्रकाशयेत्को रचितं यथावत् ।
प्रकाशितं के रसिकाः पठेयु—
स्तापाः कवीनां त्रिविधाः प्रकाशाः ॥

— 246 —

ANTOINE DE SALLE—

Love is the egotism of two.

प्रणयं प्राहुर्द्वयोरहंभावम् ।

— 247 —

R. GUTZKOV—

It is no disgrace to acknowledge an error.

प्रतिपत्तिः स्वदोषस्य न पुंसो मानहानये ।

— 248 —

HERODOTUS—

We are less convinced by what we hear than what we see.

प्रत्ययः श्रवणाज्जातो न्यूनो दर्शनसंभवात् ॥

— 249 —

HORACE—

Welcome the coming, speed the parting guest.

प्रत्युदियादायान्तं सुस्वागतमिति वदन्नातिथिम् ।
प्रस्थितमनुव्रजेदिति वदन्—शिवास्ते भवन्तु पन्थानः ॥

— 250 —

JOUBERT—

Genius begins great works, labour alone finishes them.

प्रवर्तयति कार्येषु महत्सु प्रतिभा नरम् ।
व्यवसायैकसाध्यं तु तदन्तगमनं भवेत् ॥

— 251 —

CATO—

By doing nothing men learn to do ill.

प्रवृत्तिर्जायते पुंसां कर्मत्यागात् कुकर्मणि ।

— 252 —

**MARATHI PROVERB—**

अंतकाळापेक्षां मध्यान्हकाळ कठीण.

प्राणान्तकालोऽपि तथा न दुःसहो
मध्याह्नकालः क्षुधया यथा नृणाम् ।

— 253 —

**MME DE STAEL—**

Men err from selfishness, women because they are weak.

प्रायः पुंसां स्वार्थमूलाः प्रमादाः
स्त्रीणां दोषा हन्त दौर्बल्यमूलाः ।

— 254 —

**GREELEY—**

There is work almost everywhere for him who can and will do it.

प्रायः सर्वत्र सर्वस्य कर्तव्यं कर्म विद्यते ।
स्वशक्त्या स्वेच्छया वा चेत् कुर्यात्तत्र प्रवर्तनम् ॥

— 255 —

**MRS. STOWE—**

Friendships are discovered rather than made.

प्रायो नोत्पाद्यते मैत्री व्यज्यते स्वयमेव सा ।

— 256 —

**MARTIN OPTIZ—**

Kisses are the messengers of love.

प्रेमसन्देशहरणं मिथो वदनचुम्बनम् ।

— 257 —

**CHANNING—**

Difficulties are meant to rouse, not to discourage.

प्रोत्साहनाय धीराणां धैर्यध्वंसाय नो विपद् ।

— 258 —

ENGLISH PROVERB—

People throw stones only at trees which have fruits on them.

फलभृत्स्वेव वृक्षेषु क्षिप्यन्त उपला जनैः ।

— 259 —

BIBLE—

The glory of young men is their strength; and the beauty of old men is the gray head.

बलशालिता युवगणस्य वैभवं
पलितं शिरः प्रवयसां विभूषणम् ।

— 260 —

DUTCH PROVERB—

Love that is forced does not last.

बलात्कारकृता प्रीतिर्न चिरस्थायिनी भवेत् ।

— 261 —

ENGLISH PROVERB—

Many talk like philosophers and live like fools.

बहवः पण्डिता वाचि मूर्खा एव तु कर्मणि ।

— 262 —

ZIMMERMAN—

Many have been ruined by their fortunes; many have escaped ruin by the want of fortune.

बहवो नाशमायाताः संपद्भिर्वसुधातले ।
नङ्क्ष्यन्तो बहवश्चान्ये तदभावेन रक्षिताः ।

— 263 —

COKE—

Many know many things, no one everything.

बहवो बहु जानन्ति सर्वं वेद न कश्चन ।

— 264 —

AUSONIUS—

If thou art terrible to many, then beware of many.

बहुभ्यो भेतव्यं बहुषु भयमुत्पादितवता ।

— 265 —

WARD BEECHER—

Men's best successes come after their disappointments.

भग्नाशानां सिद्धयो या भवन्ति
ता उत्कृष्टाः सन्ति सर्वास्वपीह ।

— 266 —

LUCAN—

Fear is often concealed by a show of daring.

भयमसकृत् संव्रियते धूर्तैर्धैर्यप्रदर्शनेनैव ।

— 267 —

POPE—

Teach me to feel another's woe, to hide the fault I see.

भवतु स्वसुखानपेक्षया
परदुःखव्यथितं मनो मम ।
भवतु स्वगुणाप्रकाशने
परदोषावरणे च पाटवम् ॥

— 268 —

MURPHY—

None but cowards lie.

भवन्त्यनृतवादिनः प्रकृतिकातरा नेतरे ।

— 269 —

SPENSER—

Vile is the vengeance on the ashes cold.

भस्मीभूतकलेवरे रिपुवरे धिग्वैरनिर्यातनम् ।

— 270 —

ENGLISH PROVERB—

The burden one likes is cheerfully borne.

भारोऽपि यः प्रीतय एव यस्य
स तं हि सानन्दभरं बिभर्ति ।

— 271 —

COLTON—

Unlike the sun, intellectual luminaries shine brightest after they set.

भास्करस्य न भा भाति कदाप्यस्तमुपेयुषः ।
धीशालिनो गता अस्तं भवन्त्यधिकभासुराः ॥

— 272 —

SIR PHILIP SIDNEY—

Fear is more painful to cowardice than death to true courage.

भीरूणां यादृशी पीडा भयादेव प्रवर्तते ।
धीराणां तादृशी नैव मरणादपि जायते ॥

— 273 —

LA BRUYERE—

There are only two ways of rising in the world, either by one's own industry or by the weakness of others.

भुवि प्रतिष्ठामुपयातुमिच्छो–
र्द्वावेव मार्गौ भवतो न चान्यः ।
स्वयं समुद्योगपरत्वमेक–
स्तथापरो दुर्बलता परेषाम् ॥

— 274 —

CHAMFORT—

There are more fools than wise men, and even in the wise more folly than wisdom.

भूयांस एव भुवि मन्दधियः सुधीभ्यो
मौर्ख्यं सुधीष्वपि च पाटवतोऽस्ति भूयः ।

— 275 —

SENECA—

As a field, however fertile, can yield no fruit without culture, so neither can the mind of man without education.

भूरुर्वरापि फलदा न भवत्यकृष्टा
धीश्चापि नो फलवती यदि नो विनीता ।

— 276 —

DOUGLES JERROLD—

There is a peace more destructive of the manhood of living-man than war is destructive of his material body. Chains are worse than bayonets.

भौतिकपिण्डविनाशकरः
प्राणभृतां समरोऽपि वरः ।

न पुनः पौरुषहानिकरः
श्लाघ्यः सुखशान्तिप्रसरः।
वरमरिशितशराभिन्नमुरः
खलपुरतो नमितं न शिरः।

— 277 —

SHAKESPEARE—

A smile recures the wounding of a frown.

भ्रूभङ्गमात्रेण कृतं हृदन्तरे
क्षतं स्मितेनापि नृणां विरोप्यते।

— 278 —

ENGLISH PROVERB—

No bees, no honey;
No work, no money.

मधुपाभावे न हि मधु लभ्यम्-
उद्यमविरहे द्युम्नमलभ्यम्।

— 279 —

VICTOR HUGO—

Adversity makes men, and prosperity makes monsters

मनुष्याणां मनुष्यत्वं विपद्येव प्रकाशते।
संपत्काले पुनस्तेषां राक्षसत्वं प्रचीयते॥

— 280 —

ANDREW JACKSON—

Heaven will be no heaven to me if I do not meet my wife there.

मम पत्नीसमेतस्य भूरासीत्स्वर्गसौख्यदा।
स्वर्गोऽप्यस्वर्ग एव स्यात्तत्र पत्नीमपश्यतः॥

— 281 —

ममेदमस्तीति मुदं य एति
नास्तीति शोकं न कदापि याति।
स एव विद्वान् मतिमान् कृतज्ञः
संसारसारं किल वेद नान्यः॥

— 282 —

**LORD LANDSDOWN—**

To die and part is a less evil; but to part and live, there, there is the torment.

मरणकृतवियोगो विप्रयोगोपपन्नात्
भवति सुखविषह्यो जीवनान्मानवानाम्।

— 283 —

**SENECA—**

Whatever has exceeded its due bounds is ever in a state of instability.

मर्यादां यदतिक्रान्तं तदस्थैर्ये स्थितं सदा।

— 284 —

**LA ROCHE—**

It is only great men who can afford to have great defects.

महत्स्वेव दोषा महान्तो भवन्तु
विदोषाः पुनः सन्तु ये नो महान्तः।

— 285 —

**MOTTO—**

Honour follows him who flies from her.

मानना तमनुयाति मानवं
यः पुरो व्रजति तामनानयन्।

— 286 —

ENGLISH PROVERB—

Where God helps, nought harms.

मारकं किं भवेत्कस्य तारके परमेश्वरे ।

— 287 —

WHATELY—

He only is exempt from failures who makes no effort.

मुक्तः स एव किल कार्यविपत्तिदोषात्
कर्तुं न यो यतत एव कदापि कार्यम् ।

— 288 —

ENGLISH PROVERB—

The heart of a fool is in his mouth, but the mouth of a wise man is in his heart.

मुखे मूर्खस्य हृदयं प्राज्ञस्य हृदये मुखम् ।

— 289 —

DANISH PROVERB—

Many are fain to praise what is right and do what is wrong.

मुदैव युक्तं बहवः स्तुवन्ति
स्वयं त्वयुक्तं चरितं चरन्ति ।

— 290 —

ST. PAUL—

Rejoice with those that rejoice, and weep with those that weep.

मुदितैर्मुदमुपयायाच्छोकग्रस्तैः समं शुचं कुर्यात् ।

— 291 —

ANONIMOUS—

The art preservative of all others (i. e. printing)

मुद्रणकला कलानां सकलानां रक्षिका विनिरमायि ।

— 292 —

**LAVATER**—

Airs of importance are the credentials of impotence.

मुद्रा गौरवपिशुना लाघवमन्तर्गतं प्रकाशयति

— 293 —

**SHAKESPEARE**—

When we are born we cry that we are come
To the stage of fools.

मूर्खाणां नटतां नटोऽहमधुना रङ्गं प्रविष्टोऽपरः—
इत्येवं मनसाकलय्य कलये जातः शिशू रोदिति ।

— 294 —

**CICERO**—

There is no fool who is happy, and no wise man who is not

मूर्खो न कश्चिद् भुवने सुखी यः
प्राज्ञोऽपि कश्चिन्न सुखी न योऽस्ति ।

— 295 —

**SPANISH PROVERB**—

What the fool does at length, the wise man does at the begining.

मूर्खो यदन्ते कुरुतेऽनुभूय
प्राज्ञस्तदादौ कुरुते विचार्य ।

— 296 —

**CAMPBELL**—

To live in the hearts we leave behind,
Is not to die.

मृतोऽपि म्रियते नैव जीवतां हृदये वसन् ।

— 297 —

WARD BEECHER—

Truths are first clouds, then rain, then harvests and food.

मेघपर्जन्यसस्यान्नसमं सत्यं यथाक्रमम् ।

— 298 —

LAVATER—

He knows not how to speak who cannot be silent; still less how to act with vigour and decision.

मौनमाश्रयितुमक्षमोऽस्ति यो
वेद सम्यगभिभाषितुं न सः ।
कर्म कर्तुमवलम्ब्य पौरुषं
वेत्त्वसौ स्थिरतया कुतस्तराम् ॥

— 299 —

HARE—

He must be a thorough fool who can learn nothing from his own folly.

मौर्ख्यात् स्वस्यैव यो मूर्खो न किंचिच्छिक्षितुं क्षमः
मूर्खाणामपि मूर्खोऽसौ भवत्येव न संशयः ॥

— 300 —

JOHNSON—

Where there is no hope, there can be no endeavour.

यत्राशाया अनवसरः—
तत्र न यत्नस्य प्रसरः ।

— 301 —

ENGLISH PROVERB—

There is more pleasure in loving than in being loved.

यथा प्रणयिता सुखा प्रणयपात्रता नो तथा ।

OR

प्रियो भवन् यत् सुखमश्नुते नर-
स्ततोऽधिकं स्वप्रियतां परान्नयन् ।

— 302 —

ENGLISH PROVERB—

Where we can't do as we would,
We must do as we can.

यथेष्टं न कर्तुं यदा पारयामो
यथाशक्ति कार्यं तदा यत्स्वकार्यम् ।

— 303 —

SIR ROBERT HOWARD—

All mankind is one of the two cowards—either to wish to die when he should live, or live when he should die.

यदा जीवितव्यं तदा मर्तुमिच्छा
यदा मृत्युकालस्तदा जीवितेच्छा ।
ययोस्तावुभौ कातरावेव गण्यौ
तदेवं गते के न कातर्यभाजः ॥

— 304 —

ROCHEFOUCAULD—

If you do not find rest in yourself, it is useless to look for it elsewhere.

यदि निजहृदि शान्तिं विन्दसे नात्मनेष्टाम्-
अहह सुविफला स्यादन्यतोऽन्वेषणास्याः ।

— 305 —

ENGLISH PROVERB—

The heart sees further than the head.

यदीक्षितुं धीः शक्ता हृदयं पश्यति ततोऽपि यत्परतः ।

— 306 —

**WALTEN—**

No man can lose what he never had.

यद्यदीयं न जात्वासीत्तस्य नाशः कुतो भवेत् ।

— 307 —

**MACHIAVELLI—**

Every one sees what you seem, few know what you are.

यद्रूपो दृश्यते यस्तं तद्रूपं को न पश्यति ।
यद्रूपो विद्यते यस्तं तद्रूपं कोऽपि पश्यति ॥

— 308 —

**GOETHE—**

I do not speak of what I cannot praise.

यन्न याति मम शंसनीयतां
न ब्रुवे तदधिकृत्य किंचन ।

— 309 —

**ANONIMOUS—**

A picture is a poem without words.

यन्नाम रुचिरं चित्रमशब्दं काव्यमेव तत् ।

— 310 —

**GOTHE—**

What we don't understand we do not possess.

यन्नावगतं तन्नाधिगतम् ।

— 311 —

**LA PLACE—**

What we know here is very little, but what we are ignorant of is immense.

यन्नो ज्ञातं तदत्यल्पमज्ञातं बहुलं भुवि ।

— 312 —

**LA FOUNTAINE**—

We always take credit for the good, and attribute the bad to fortune.

शुभागमे स्वं नर उद्यमं स्तुते
विधिं विनिन्दत्यशुभे ह्युपस्थिते ।

— 313 —

**GUJARATHI PROVERB**—

जेनु काम तेनु थाय बीजा करे सो गोता खाय.

यस्य यत्सहजं कर्म तस्य तत्सुकरं भवेत् ।
अन्यस्य तु चिकीर्षोस्तत् तत्ताद्विघ्नसमन्वितम् ॥

— 314 —

**JOHN TOBIN**—

She is adorned
Amply that in her husband's eye looks lovely,
The truest mirror that an honest wife
Can see her beauty in.

या पाणिपीडनकृतो नयनाभिरामा
सा तत्त्वतो बहुलभूषणभूषिताङ्गी ।
भर्तुर्हि चक्षुरिह दर्पणतां प्रयाति
रूपावलोकनविधौ न परं सतीनाम् ॥

— 315 —

**GOETHE**—

If thou desirest a wise answer, thou must ask a reasonable question.

युक्तः प्रश्नोऽपि कर्तव्यो युक्तमुत्तरमीप्सता ।

— 316 —

**SHAKESPEARE**—

So wise, so young, they say do ne'er live long.

युवानोऽपि ये ज्ञानवृद्धा भवन्ति
चिरं नैव जीवन्ति लोका वदन्ति ।

— 317 —

ENGLISH PROVERB—

If the young men knew, if the old could, there's nothing but would be done.

युवानो यदि जानीयुः स्थविराः शक्नुयुर्यदि ।
न किंचिदवतिष्ठेत कर्तव्यमकृतं भुवि ॥

— 318 —

ENGLISH PROVERB—

A thing you don't want is dear at any price.

येन कार्यमिह नास्ति वस्तुना
स्वल्पमूल्यमपि तद्धि महार्घम् ।

— 319 —

ENGLISH PROVERB—

He that deserves nothing should be content with anything

येन केनाप्यसौ तुष्येन्न किंचिदपि योऽर्हति ।

— 320 —

SHAKESPEARE—

A giving hand though foul, shall have fair praise.

यो दक्षो दानदीक्षायां हीनवर्णोऽप्यसौ करः ।
वर्णं शुचितमं प्राप्य धवलः सन् विराजते ॥

— 321 —

SPENSER—

Who will not mercy unto others show, how can he mercy even hope to have ?

यो दयां वितनुते न परेषु
हा कथं भवति सोऽत्र दयार्हः ।

— 322 —

**PORT. PROVERB—**

He doubts nothing who knows nothing.

यो न किंचिद्विजानाति न चापि स विशङ्कते ।

— 323 —

**SPANISH PROVERB—**

Who knows most says least.

योऽनल्पं वेत्ति । सोऽत्यल्पं वदति ॥

— 324 —

**TERENCE—**

As you cannot do what you wish, you should wish what you can do.

यो न शक्नोति तत्कर्तुं कर्तुं यदभिवाञ्छति ।
कर्तुं वाञ्छेत्तदेवासौ कर्तुं शक्नोति यत्स्वयम् ॥

— 325 —

**FRENCH PROVERB—**

To will is to be able.

यो यत्कर्तुं बलवदिच्छति
न स साधयितुं तन्न प्रभवति ।

— 326 —

**FRENCH PROVERB**

If you trust before you try, you may repent before you die.

योऽर्थेऽननुभूते विश्वासं कुरुते
स किल मृतेः पूर्वं कदाचिदनुशेते ।

— 327 —

**ITALIAN PROVERB**—

He who knows not knows a good deal if he knows how to hold his tongue.

यो वेद मौनं श्रयितुं यथावत्-
अज्ञोऽपि सुज्ञः सुतरां स गण्यः ।

— 328 —

**POPE**—

Vice is a monster of such frightful mien,
As to be hated needs but to be seen;
Yet seen too often familiar with her face,
We first endure, then pity, then embrace.

राक्षसी कुवृत्तिसंज्ञकातिमात्रभीषणा
द्वेषणाय जायते विलोकनक्षणे नृणाम् ।
वीक्षिता मुहुर्मुहुस्तु सैव जातसंस्तवा
क्षम्यतेऽनुकम्प्यते क्रमाद्धतोपगुह्यते ॥

— 329 —

**TULASIDAS**—

नारी ओको निन्दो नये नारी नरका खान
जिस खानमे पैदा हुवे भीष्म राम हनुमान

रामभीष्मादयो यस्यामुत्पन्ना लोकपावनाः ।
नररत्नखनिं नारीजातिं तां मैव निन्दत ॥

— 330 —

**ENGLISH PROVERB**—

Love can neither be bought nor sold, its only price is love.

रागस्य मूल्यं किल राग एव
धनेन नायं क्रयविक्रयार्हः ।

— 331 —

PUBLIUS SYRUS—

Gain at the expense of reputation should be called loss.

लाभोऽपि हानिः किल कीर्तिनाशे ।

— 332 —

JOHNSON—

The covetuous man never has money and the prodigal will have none shortly.

लुब्धस्य वित्तं न कदापि विद्यते
भूरिव्ययस्याप्यचिराद्विनङ्क्ष्यति ।

— 333 —

TILLOTSON—

The covetuous man heaps up riches, not to enjoy but to have them.

लुब्धो न भोक्तुं सविधे निधातुं
धनस्य राशीन् वत संचिनोति ।

— 334 —

GERMAN PROVERB —

Let the people talk and the dogs bark.

लोकाश्च शुनकाश्चापि वदन्तु च भषन्तु च ।

— 335 —

SOPHOCLES—

No word that is profitable is bad.

वचो हितं दुर्वचनं न किंचित् ।

— 336 —

**PLAUT**—

What is spoken flies, what is written remains.

वदनाद्वाग्विनिर्याता विहायसि विलीयते।
लिखितं यत्तु किंचित्स्याद्वज्रलेपायते ध्रुवम् ॥

— 337 —

**COLTON**—

Most of our misfortunes are more supportable than the comments of our friends upon them.

वरं विसोढा विपदोऽपि साक्षात्—
न तद्गता दोषगिरो जनानाम्।

— 338 —

**LORD AVEBURY**—

It is better to think of the merits of your enemies than of the defects of your friends.

वरं सुधीभिः सुविचारिता ये
गुणा रिपूणां सुहृदां न दोषाः।

— 339 —

**BEN. FRANKLIN**—

Rather go to bed supperless than rise in debt.

वरं सुप्तमनाहारैर्ऋणवाद्भिस्तु नोत्थितम्।

— 340 —

**FELTHAM**—

To be humble to our superiors is duty, to our equals courtesy to our inferiors, generosity.

वरिष्ठेषु नम्रः स्वकर्तव्यदक्षः
समानेषु नम्रो नरश्चेत्स सभ्यः ।
कनिष्ठेषु नम्रो वरिष्ठो यदि स्यात्—
महौदार्यभाजं महान्तस्तमाहुः ॥

— 341 —

TENNYSON—

An obedient wife commands her husband.

वशयति पतिं नूनं पत्नी स्वयं वशवर्तिनी ।

— 342 —

SCHOPENHAUER—

Vain people are loquacious; and proud taciturn.

वाचाटा अतिमादमत्तमनसो वाचंयमा मानिनः

— 343 —

विक्रेयं यस्य नो किंचिद्विपणिस्थेन तेन किम् ।
विपुले सति विक्रेये कोणस्थोऽपि समृध्यति ॥

— 344 —

DISRAELI—

No affections and a great brain, these are the men to command the world.

विकारहीनाः समुदग्रबुद्धयो
जगत् समग्रं वशयन्ति नेतरे ।

— 345 —

CARLYLE—

Literature is the thought of thinking souls.

विचारवद्भिर्गदितं विचार्य यत्
तत् तत्त्वतो वाङ्मयमुच्यते बुधैः ।

— 346 —

**JOHNSON—**

Money and time are the heaviest burden of life and the unhappiest of all mortals are those who have more of either than they know how to use.

वित्तं च वेला च सुदुर्वहौ स्तो
भारौ स चैवेह नृणामधन्यः ।
त्रिश्रय एते विपुले न वेत्ति
कथं विधेयो बत सूपयोगः ॥

— 347 —

**HORACE—**

Knowledge without education is but armed injustice.

विद्वानविनयोपेतः सशस्त्रोऽनय उच्यते ।

or

या विद्या विनयं विना स गदितो मूर्तः सशस्त्रोऽनयः

— 348 —

**MAHOMED—**

Two things I abhor: the learned in his infidelities and the fool in his devotions.

विद्वाञ् श्रद्धाविहीनो वा श्रद्धावाञ् मूर्ख एव वा ।
द्वावपीमौ गर्हणीयाविति माहम्मदोऽब्रवीत् ॥

— 349 —

**SIR W. TEMPLE—**

Learning passes for wisdom among those who want both.

विद्या प्रज्ञेति मन्वानाः प्रायेणोभयवर्जिताः ।

— 350 —

MACAULAY—

Knowledge advances by steps and not by leaps.

विद्या मन्दपदं प्रयाति सततं नैव द्रुतं कर्हिचित् ।

— 351 —

YOUNG—

Learning makes a man fit company for himself.

विद्या विद्यावतः पुंसोऽनुरूपा सहचारिणी ।

— 352 —

PHÆDR—

A learned man has always riches in himself.

विद्या विद्यावतां वित्तं स्वायत्तं सततं हितम् ।

— 353 —

GEORGE COLMAN THE YOUNGER—

On their own merits modest men are dumb.

विनयशालिनो ये भवन्ति ते
स्वगुणवर्णने जोषमासते ।

— 354 —

STEELE—

Nothing can atone for the want of modesty without which beauty is ungraceful and wit detestable.

विनयेन विना सुरूपता
न च शोभां भजते सुविद्यता ।
तदभावकृतस्य निष्कृति—
र्न हि दोषस्य गुणेन केनचित् ॥

— 355 —

विपदं सहमानस्य धैर्येणैव प्रयोजनम् ।
संपदं तूपभुञ्जानो गुणग्राममपेक्षते ॥

— 356 —

ENGLISH PROVERB—
He that ceases to be a friend never was a good one.

विरमन्मित्रीभावादभून्न पूर्वं कदापि सन्मित्रम् ।

— 357 —

विरहे विषमः कामोऽनुकूलः संगमे पुनः ।
निदाघे दुःसहो वह्निर्हेमन्ते सुखदो भवेत् ॥

— 358 —

GRATHAM—
At twenty years of age the will reigns, at thirty the wit; and at forty, the judgment.

विंशे वर्षे वयसः स्वेच्छा प्रभवति विदग्धता त्रिंशे ।
चत्वारिंशे तु नृणां विवेकिता चित्तमास्पदं कुरुते ॥

— 359 —

OVID—
That you may please others you may be forgetful of yourself.

विस्मर्तव्यः स्व एवात्मा पराराधनकामुकैः ।

— 360 —

CICERO—
Liberty consists in the power of doing that which is permitted by the law.

विहितस्यानुष्ठाने प्रभुता या सा स्वतन्त्रता पुंसः ।

— 361 —

TERENCE—

Abundance changes the value of things.

वैपुल्यं किल वस्तूनां मूल्यस्य परिवृत्तये ।

— 362 —

CICERO—

Be our enmities for a time, our friendships for eternity.

वैराणि क्षणमेव सन्तु नाम

विद्यन्तां सततं तु सौहृदानि ।

— 363 —

PUBLIUS SYRUS—

The pain of the mind is worse than the pain of the body.

व्याधितोऽपि विशिष्टत्वमाधेरेव विराजते ।

— 364 —

GOETHE—

Happy is he who soon discovers the chasam that lies between his wishes and his powers.

शक्यमिष्टात्कियद्दूरमिति जानन् सुखी भवेत् ।

— 365 —

MARATHI PROVERB—

मारणाराचा हात धरवतो पण बोलणाराचें तोंड धरवत नाहीं.

शक्यो वारयितुं करः प्रहरतो न त्वाननं जल्पतः ।

— 366 —

SENECA—

A forest is long in growing, but in a moment it may be reduced to ashes.

शनैः शनै रोहति काननं चिरं
क्षणेन भस्मीक्रियते तु वह्निना ।

— 367 —

ARISTOTLE—

Friendship is one mind in two bodies

शरीरद्वये मित्रयोश्चित्तमेकम् ।

— 368 —

LANDOR—

The religion of Christ is peace and good will, the religion of christendom is war and ill-will.

शान्तिः सद्भावना चेति क्रिस्तोक्तो धर्म उत्तमः ।
युद्धे वैरे च निरताः क्रिस्तधर्मानुयायिनः ॥

— 369 —

SENECA—

Men learn while they teach.

शिक्षयञ् शिक्षते यो यत् सा शिक्षा तस्य तत्त्वतः ।

— 370 —

HOMER—

The gods hearken to him who hearkens to them.

शृण्वन्ति वचनं देवास्तस्यैवैषां शृणोति यः ।

— 371 —

STERNE—

The brave only know how to forgive.

शूरा एव विजानन्ति प्रयोक्तव्या क्षमा कथम् ॥

— 372 —

**ANONIMOUS**

Oh spring ! the childhood of the year,
Oh childhood ! the spring of life.

शैशवं वत्सरस्य त्वं रे वसन्त विराजसे ।
वसन्तो जीवितस्य त्वं रे रे शैशव भासि मे ॥

— 373 —

श्रियानुत्सेकवान् श्रीमानश्रिया चाविषादवान् ।

— 374 —

**GOETHE—**

On the pinnacle of fortune man does not stand long firm.

श्रीशैलशृङ्गेऽत्र नितान्ततुङ्गे
चिरं स्थिरं स्थातुमलं न कोऽपि ।

— 375 —

**ENGLISH PROVERB—**

Government of the will is better than increase of knowledge

श्रेयान् कृतः संयम इन्द्रियाणां
विवर्धनाज्ज्ञानधनस्य पुंसा ।

— 376 —

**TERENCE—**

Good to him who knows how to use it.

श्रेयांसि तस्योपनमन्तु पुंसो
जानाति यो भोक्तुमिमानि सम्यक् ।

— 377 —

**MARATHI PROVERB—**

चार दिवस सासूचे आणि चार दिवस सुनेचे.

श्वश्रूः प्रभवति कतिचिदहानि
प्रभवति कतिचित् स्नुषा दिनानि ।

— 378 —

ENGLISH PROVERB—

Vows made in storms are forgotten in calms.

संवित्संपदि याति विस्मृतिपथं पूर्वं कृता यापदि ।

— 379 —

BODENSTEDT—

Only he who enjoys life aright finds it easier to bear the evils of it.

संसारेऽस्मिन् ये रमन्ते यथावत्
क्लेशान् सोढुं तस्य शक्तास्त एव ।

— 380 —

TROLLOPE—

He is the best dressed gentleman whose dress no one observes.

स एव गण्यः पुरुषः सुवेषो
निरीक्षते यस्य न कोऽपि वेषम् ।

— 381 —

CARLYLE—

The universe is the realized thought of God.

संकल्पो व्यक्तिमापन्नो विधातुर्विश्वमुच्यते ।

— 382 —

AUERBACH—

Music washes away from the soul the dust of everyday life.

सङ्गीतं परिमार्ष्टि मानसमलं संसारकर्मोद्भवम् ।

— 383 —

JOHNSON—

The two great movers of the human mind are the desire of good and the fear of evil.

सतो वाञ्छा चित्तं चलयति तथा भीतिरसतः।

— 384 —

JOHNSON—

It is useless to deny with the tongue that which a man gives credence to with the heart.

सत्यत्वं मनसा यस्य मनुजेन प्रतीयते।
निराकृतेन किं तेन वाचार्थेन प्रयोजनम्॥

— 385 —

CARLYLE—

Truth is to be loved purely and solely because it is true.

सत्ये सत्यत्वमित्येव सर्वेषां रुचयेऽस्तु तत्।

— 386 —

LESSING—

A poison which does not take immediate effect is therefore none the less a dangerous poison.

सद्यो न मूर्च्छतीत्येव न विषं ह्यविषायते।

— 387 —

SOCRATES—

Contentment is natural wealth; luxury artificial poverty.

संतोषाख्यं हि साधूनां स्मृतं वित्तमकृत्रिमम्।
तथा भोगस्पृहा नाम कृत्रिमोक्ता दरिद्रता॥

— 388 —

**ENGLISH PROVERB—**

Maintain peace with men, war with their vices.

**संधेया मानवाः सर्वे द्वेष्यास्तेषां तु दुर्गुणाः ।**

— 389 —

**ENGLISH PROVERB—**

He is the greatest conqueror who has conquered himself.

**स नाम जयिनां जयी जयति यो निजं मानसम् ।**

— 390 —

**RALEIGH—**

Fain would I climb but that I fear to fall.

**QUEEN ELIZABETH—**

If thy heart fail thee, why then climb at all.

**समुत्पतेयं परया मुदाहं**
**न पातभीतिर्यदि चेतसि स्यात् ।**

❀ ❀

**यद् ध्वंसते ते हृदयस्य धैर्यं**
**वृथा कृथा मोत्पतने प्रयासम् ॥**

— 391 —

**ENGLISH PROVERB—**

One cloud is enough to eclipse all the sun.

**संपूर्णं रविबिम्बं पिधातुमेकोऽप्यलं नभसि मेघः ।**

— 392 —

**CECIL—**

Eloquence is vehement simplicity.

**सरलत्वं प्रोत्कटं यद्वाचां सा नाम वाग्मिता ।**

— 393 —

सरलः सरलेन संगतः
सुचिरं स्निग्धतयैव वर्तते ।
कुटिलेन तु तस्य संगति-
र्धनुषेवास्ति शरस्य न स्थिरा ।

— 394 —

सरसि सुनिर्मलनीरे न स्थैर्यं कलुषता कुतोऽप्येति ।
सुतरां कलुषजले वा निर्मलताऽपि न चिरं स्थितिं भजति ॥

— 395 —

BACON—

Nuptial love maketh mankind; friendly love perfecteth it; but wanton love corrupteth and embaseth it.

सर्गे हेतुः प्रेम दाम्पत्यजन्यं
पूर्णत्वे तु प्रेम सौहार्दजन्यम् ।
हा भ्रष्टत्वे चाधमत्वे च हेतुः
स्त्रीणां पुंसां कामजप्रेमयोगः ॥

— 396 —

सर्वं स्वर्णभृतां भुवीह सुगमं स्वर्गः पुनर्दुर्गमः ।

— 397 —

SHAKESPEARE—

All's well that ends well.

सर्वं स्वन्तं गण्यते साधु सर्वैः ।

OR

तत्सर्वं साधु यत्स्वन्तं यद्दुरन्तं तदन्यथा

— 398 —

**LAVATER—**

Trust him little who praises all, him less who censures all, and him least who is indifferent about all.

सर्वानपि स्तुवन्नल्पं निन्दन्नल्पतरं ततः ।
उदासीनस्त्वल्पतमं नरो विश्वासमर्हति ॥

— 399 —

**CERVANTES—**

There is a remedy for everything but death.

सर्वापदां प्रतीकारः शक्यः स्यान्मरणादृते ।

— 400 —

**VOLTAIRE—**

All sects are different, because they come from men, morality is everywhere the same, because it comes from God.

सर्वे धर्मपथा भिन्नास्ते हि मानवकर्तृकाः ।
नीतिस्त्वेकैव सर्वत्र परमेश्वरकर्तृका ॥

— 401 —

**OKEN—**

Man is the sum total of all animals.

सर्वेषामपि सत्त्वानां सारभूतो हि मानवः ।

— 402 —

TERENCE—

There is no greater misfortune than not to be able to endure misfortune.

सहने विपदामपाटवात्—
बत काचिन्न गरीयसी विपद् ।

— 403 —

BISHOP TAYLOR—

To be proud of learning is the greatest ignorance.

साज्ञानस्य परा काष्ठा या ज्ञानेन सगर्वता ।

— 404 —

SCHILLER—

Freedom exists only with power.

सामर्थ्येनैव संवासः स्वातन्त्र्यस्य विराजते ।

— 405 —

SHAKESPEARE—

The labour we delight in physics pain.

सायासमपि यद्रम्यं तत्कर्मार्त्तिहरं नृणाम् ।

or

सायासमपि यत्कर्म रमयेद्यस्य मानसम् ।
तत्तस्यापहरेदार्त्तिं क्रियमाणं यथासुखम् ॥

— 406 —

YOUNG —

A man of pleasure is a man of pains.

सुखसङ्गी किल दुःखविभागी ।

— 407 —

GOETHE—

The toil of life alone teaches us to value the blessings of life.

सुखस्य मूल्यं कियदित्यवैति को
विनैव दुःखानुभवेन संसृतौ।

— 408 —

SENECA—

Enjoy your present pleasures so as not to injure those that are to follow.

सुखानि भोग्यानि तथागतानि
यथास्ति नो हानिरनागतानाम्।

— 409 —

W. HAWFF—

Grief is a stone that bears one down, but two bear it lightly.

सुदुर्वहैकस्य शिला विशाला
द्वयोः पुनः सा सुवहत्वमेति।
असह्य एकस्य च यः स एव
सह्यो द्वयोः स्याद् गुरुशोकभारः॥

— 410 —

POPE—

The finest minds like finest metals, dissolve the easiest.

सुधातुवत् सुमनांसि सुद्रवाणि।

— 411 —

SPANISH PROVERB—

To him who has a good wife no evil can come which he cannot bear.

सुभार्याणां पुंसां व्यसनमविषह्यं न किमपि।

— 412 —

FRENCH PROVERB—

He has enough who is content.

सोऽलंधनो यस्य मनो हि तृप्तम् ।

— 413 —

ENGLISH PROVERB—

Maidens should be mild and meek
Swift to hear and slow to speek.

सौम्यस्वभावा विनयोपपन्नाः
शीघ्रायमाणाः श्रवणेऽन्यवाचाम् ।
मन्दायमाना वचनप्रयोगे
कुमारिकाः स्युः कुलशीलभाजः ॥

— 414 —

LORD BEACONSFIELD—

Youth is a blunder, manhood a struggle, old age a regret.

स्खलितमयं तारुण्यं कष्टमयं मध्यमं वयो नृणाम् ।
तैस्तैश्चरितैश्चरितैर्वार्द्धकमनुतापसंकुलं भवति ।

— 415 —

LA ROCHE—

Praise is generally given only that it may be returned.

स्तुवन्नपेक्षते प्रायः स्तूयमानात् प्रतिस्तवम् ।

— 416 —

GLADSTONE—

To be womanly is the greatest charm of woman.

स्त्रीत्वे स्त्रीणां कापि शोभा चकास्ति ।

— 417 —

EMERSON—

All mankind love a lover.

स्निग्धे स्निग्धा मानवा सर्व एव ।

— 418 —

STERNE—

Without a friend to share it, no good we possess is truly enjoyable.

श्रेयो न भोग्यं किमपीह तत्त्वतः
प्रेयो न मित्रं बत संविभागि चेत् ।

— 419 —

SHAKESPEARE—

Praising what is lost makes the remembrance dear.

स्मृतिर्मधुरतामेति व्यतीतस्य प्रशंसया ।

— 420 —

स्वदेशहितसाधने हि निधनं वृतं श्रेयसे ।

— 421 —

PLATO THE YOUNGER—

The blind man bears the lame and onward hies
Made right by lending feet and borrowing eyes.

स्वपादौ पङ्गवे दत्त्वा तस्मादादाय लोचने ।
स्कन्धे कुर्वंस्तमन्धोऽपि चक्षुष्मानिव संचरेत् ॥

— 422 —

स्वपुरःस्थमपि स्तम्भं तावदन्धो न बोधति ।
उरसि प्रहतो यावद्गच्छन् पतति नो भुवि ॥

— 423 —

**BEAUMELLE—**

Life is a dream and death an awakening.

स्वप्नोपमं जीवितमामनन्ति
मृत्युं प्रबोधोपममेव सन्तः ।

— 424 —

**GOETHE—**

Dexterity or experience no master can communicate to his disciple.

स्वयं सर्वज्ञोऽपि प्रभवति न शिष्ये वितरितुम् ।
क्रियायां कौशल्यं गुरुरनुभवं स्वीयमपि वा ॥

— 425 —

**PASCAL—**

Little consols us because little affects us.

स्वल्पेनैव व्यथितमनसां स्वल्पमाश्वासनाय ।

— 426 —

**ADDISON—**

A man's first care should be to avoid the reproaches of his own heart, his next to escape the censures of the world.

स्वस्यादौ हृदयस्य भर्त्सनानि
लोकानां परिहर्तुमथ प्रयत्यम् ।

— 427 —

**PYTHAGORAS—**

No man is free who cannot command himself.

स्वं यस्तन्त्रयितुं नालं स स्वतन्त्रो न कश्चन ।

— 428 —

BERTRAND—

The tree of liberty grows only when watered by the blood of tyrants.

स्वातन्त्र्यवृक्षो न हि जातु रोहे-
दनुक्षितः पीडकरक्तवार्भिः ।

— 429 —

M. W. SHAW—

Liberty, like chastity, once lost, can never be regained in its original purity.

स्वातन्त्र्यं न सकृद्भ्रष्टं पातिव्रत्यमिवाप्यते ।
कदाचिदपि भूयो यद्विशुद्धं पूर्ववद्भवेत् ॥

— 430 —

GEN. FOY—

Freedom is the eternel youth of nations.

स्वातन्त्र्यं नाम राष्ट्राणां शाश्वतं यौवनं स्मृतम् ।

— 431 —

BURKE—

Liberty without wisdom, is license.

स्वातन्त्र्यं प्रज्ञया हीनं केवलं स्वैरचारिता ।

— 432 —

SENECA—

It is the nature of man to err, of a fool to persevere in error.

स्वाभाविकमिदं पुंसां स्खलन्ति यदमी क्वचित् ।
मूर्खाणां तु स्वभावोऽयं यत्स्खलन्ति पुनः पुनः ॥

— 433 —

MARATHI PROVERB—

आपलेच दांत आणि आपलेच ओंठ.

स्वीयैरेव स्वीयौ दन्तैरोष्ठौ यदि प्रदश्येते।
न हि न हि ते नो दण्ड्यास्तावपि न हि नानुकम्पनीयौ च

or

स्वीया दन्ताः स्वीयावोष्ठा–
वुभयेऽपीष्टा मनुजानाम्।

— 434 —

GERMAN PROVERB—

God cures and the doctor gets the fee.

हरिर्हरति नो व्याधीन् वैद्यो वित्तहरः पुनः।

— 435 —

MARATHI PROVERB—

आडला नारायण गाढवाचे ( गरुडाचे ) पाय धरी.

हा हन्त कुण्ठितगतिर्व्यसनैर्महद्भि–
र्नारायणोऽपि गरुडं शरणीकरोति।

— 436 —

CHAMFORT—

Contact with the world either breaks or hardens the heart.

हा हन्त जगतानेन संसर्गो घटितः किल
हृदो भङ्गाय भवति काठिन्योत्पादनाय वा।

— 437 —

CERVANTES—

All that glisters is not gold.

हा हा चकास्तीति न हेम सर्वम्।

— 438 —

CICERO—

The study of literature nourishes youth, entertains old age, adorns prosperity, solaces adversity, is delightful at home, unobtrusive abroad, deserts us not by day nor by night, in journeying nor in retirement.

अध्ययनं किल वाङ्मयस्य कल्पते यूनां संवर्धनाय, वृद्धानां रञ्जनाय, समृद्धानां मण्डनाय, विपद्गतानां समाश्वासनाय। गृहोषितानिदमानन्दयति। प्रोषितानां न प्रत्यूहं जनयति। न दिवानिशं विजहाति कृतव्यासङ्गान् विदेशेषु वा विविक्तेषु वा।

— 439 —

COWLEY—

Man is near all kinds of beasts, a fawning dog, a roaring lion, a thieving fox, a robbing wolf, a dissembling crocodile, a treacherous decoy, and a rapacious vulture.

प्रायेण सर्वप्राणिसगन्धतां भजते मानवः। तथा ह्ययं चाटुकरणे कुक्कुर इव, गर्जने कण्ठीरव इव, स्तेयकर्मणि जम्बूक इव, प्रसह्यहरणे वृक इव, दम्भप्रयोगे बक इव, अलीकानुकम्पायां नक्र इव, जिघत्सायां गृध्र इव।

— 440 —

SCHOPENHAUER—

No man can be in perfect accord with any one but himself.

नात्मानमन्तरेण कोऽपि केनापि साकल्येन संवादी भवति।

— 441 —

**BRUYERE—**

If this life is unhappy it is a burden to us, which it is difficult to bear; if it is in every respect happy it is dreadful to be deprived of it; so that in either case the result is the same, for we must exist in anxiety and apprehension.

दुःखमयं चेज्जीवितं ननु भारभूतमिदं सुदुर्वहतां याति धारयितुः। सर्वथा चेत् सुखमयमिदं तदापि परित्यागोऽस्य भयमावहति। एवमेकतश्चिन्तामयत्वेऽन्यतश्च साध्वसमयत्वे खल्वेतस्योभयथापि तुल्यपरिणामकारित्वं वरीवर्ति।

— 442 —

**RUSKIN—**

The man who does not know when to die, does not know how to live.

न हि कदा मर्तव्यमित्यजानञ्जानाति कथं जीवितव्यमिति।

— 443 —

सहजसौन्दर्यमण्डितानाममण्डनमेव परं मण्डनं भवति।

— 444 —

**SPENSER—**

A circle cannot fill a triangle, so neither can the whole world if it were to be compassed, the heart of a man,..............

वर्तुलेन त्रिकोण इव न हि व्याप्यते त्रिभुवनेनापि हृदयमतितृष्णाभिभूतस्य।

— 445 —

**STOPFORD BOOKE—**

Writing is not literature unless it gives to the reader a pleasure which arises not only from the things said, but from the way in which they are said; and the pleasure is only given when the words are carefuly or curiously or beautifully put together into sentences.

यन्नाम किंचिल्लिखितं तत्सर्वमपि वाङ्मयकोटिमारोढुं नार्हति। लिखितैर्हि लेखैः पाठकानां प्रीतिरुत्पादयितव्या। अनया तु प्रीत्या न केवलं लिख्यमानविषयमाहात्म्यजन्यया लेखनपरिपाटीवैदग्ध्यजनितयापि भवितव्यम्। तेषु तेषु वाक्येषु प्रयुक्तानां पदानामभियुक्तत्वं वा वैचित्र्यं वा लालित्यं वा हेतुर्भवति प्रीतिजनकत्वे वाङ्मयस्य।

— 446 —

**KEBLE—**

The distant landscape draws not nigh for all our gazing.

न हि दवीयसी स्थली कदापि प्रत्यासीदति सुचिरं निध्यातापि।

— 447 —

**QUARLES—**

The sufficiency of my merit is to know that my merit is not sufficient.

तदेव पर्याप्तत्वं गण्यते गुणानां पुरुषस्य यदसौ जानात्यपर्याप्ता मे गुणा इति।

— 448 —

ROWE—

I take him to be the only rich man that lives upon what he has, owes nothing, and is content; for there is no determinate sum of money, nor quality of estate, that can denote a man rich, since no man is truly rich that has not so much as perfectly satisfies his desire of having more; for the desire of more is want, and want is poverty.

तमेव परमार्थतो धनवन्तमाकलये यो यदृच्छोपनतेन धनेन वृत्तिं निर्वर्तयति, न कस्मैचित् किमपि धारयति, सततं च संतोषं निर्विशति। न हि केनापि नियतेन धनराशिना न वा क्षेत्रकूपारामादिसंपद्विशेषेण धनवतोऽलंधनत्वं प्रकटीक्रियते। किं नाम तावतैव धनेन धनिनो धनवत्त्वं वक्तुमुचितं यावतास्य समधिकधनलिप्सा न प्रशाम्यति। लिप्सा हि वैकल्यं पिशुनयति। वैकल्यं च दारिद्र्यान्न भिद्यते।

— 449 —

SENECA—

Not to return one good office for another is inhuman; but to return evil for good is diabolical.

यदुपकारो न प्रत्युपकारेण निर्यात्यते तत्सर्वथा मानवानर्हम्। यत्तूपकुर्वन् युज्यते प्रत्यपकारेण तत्खल्वासुरमेव।

— 450 —

**KRUMMACHER—**

See a fond mother encircled by her children; with pious tenderness she looks around, and her soul even melts with maternal love. One she kisses on its cheek, and clasps another to her bosom; one she sets upon her knee, and finds a seat upon her foot for another. And while by their actions, by their lisping words, and asking eyes, she understands their numberless little wishes, to these she dispenses a look, and a word to those; and, whether she grants or refuses, whether she smiles or frowns, it is all in tender love. Such to us, though infinitely high and aweful, is Providence; so it watches over us, comforting these, providing for those, listening to all, and assisting every one; and if sometimes it denies the favour we implore, it denies but to invite our more earnest prayers; or, if seeming to deny a blessing, it grants one in the refusal.

हन्त पश्यतेमां सुतवत्सलां मातरम्। परिवृतेयं लक्ष्यते शिशुगणेन । प्रणयपेशला दृशोऽनया परितः क्षिप्यन्ते । द्रवतीवास्या हृदयमपत्यस्नेहेन। तथा हीयं शिशुं कमपि कपोले परिचुम्बति । कमपि वक्षसा परिरभते । कमप्यङ्कमारोपयति । कमपि पादमूले संस्थाप्योपलालयति । कामं सुबहून्यपि सुपूराण्यमीषामभिलषितानि । जानाति पुनरियमखिलानीमानि तैस्तैस्तदीयैश्चेष्टितैः । बालभावादपरिस्फुटान्यपि वचनान्युदीरितां शिशूनामाशयो विज्ञायत एवानया । अक्षिविक्षेपेणैव किममीभिः पृच्छ्यत इत्यभ्यूह्यते । कदाचित् केवलं दृक्पातेन कदाचिच्च द्वित्रशब्दप्रयोगेण, तांस्तांस्तदीन् प्रश्नानुत्तरयति ।

कदाचिदमीषां प्रणयं प्रतिपद्यते । कदाचिच्च प्रत्याख्याति । कदाचित् स्मितं वितनुते । कदाचिच्च भ्रूभङ्गं विरचयति । सर्वमपीदं पुनरस्याश्चेष्टितं स्नेहमूलकमेव संदृश्यते ।

एवमेव खलु भगवती जगज्जननी कांश्चित् केवलं दृक्पातेन, कांश्चित् समाश्वासनेन समनुगृह्णती सर्वेषामपि नो योगक्षेमं वहति । संशृणोत्यस्माकं वचनानि स्फुटानिचास्फुटानि च । यदि कदाचिदस्म दभ्यर्थना नानया सफलीक्रियन्ते तदा केवलं समधिकया भक्त्या तदनुप्रसादनाय वयं प्रवर्तेमहीत्येवंप्रायोऽभिप्राय एव प्रकटीक्रियतेऽनयेति मन्तव्यम् । अथवा श्रेय एकं प्रत्यादिशन्ती प्रत्याख्यानद्वारान्यदेव किंचिदुपपादयतीत्यपि सुवचम् ।

— 451 —

ना वेद जन्मापि न जायमानो
मृत्योर्वशं यात्यवशेन्द्रियः सन् ।
जीवंस्तु जानन्नपि नोपयुङ्क्ते
सामर्थ्यमात्मस्थमनास्थ एव ॥ १ ॥

सर्गस्थितिप्रत्यवहारभाजो
मनुष्यजातेरितिहास एवम् ।
संक्षेपतो वर्णयितुं यथाव-
न्न शक्यते किं सुधियो वदन्तु ॥ २ ॥

— 452 —

Adapted from A PERSIAN SONG—

जात एव किल रोदिषि स्वयं
जात जाग्रदुपमातुरन्तिके ।

संमतेन निजजन्मना पुन—
र्हन्त हासयसि संनिधौ स्थितान् ॥ १ ॥

रे तथा जगति जीव जीवितं
संत्यजन्निदमसंशयं यथा ।
त्वं हसिष्यसि जनांश्च सर्वशो
निद्रितोऽपि किल रोदयिष्यसि ॥ २ ॥

— 453 —

Adapted from AN ENGLISH SONG—

रे पुष्प सुन्दर मनोहर चारुवर्ण
त्वं शोभसे स्वपदभूषण संप्रतीह
कालेन किन्तु कियता किल ते दलानि
हा कोमलानि विगलन्ति पुरा धरण्याम् ॥ १ ॥

म्लानिं व्रजन्तु सकलान्यथ वा दलानि
वर्णो विनश्यतु तनुर्विलयं प्रयातु ।
लोकंपृणः परिमलस्तु तवास्ति कोऽपि
येनैव जन्म सफलीक्रियते तवेह ॥ २ ॥

त्वद्वद्द्वयोऽभिनवमस्तु विलोभनीयं
रूपं च नाम रमणीयतरं नराणाम् ।
हा हन्त कालवशतोऽखिलमेति नाशं
त्वत्सौरभेण सदृशं यश एव शेषम् ॥ ३ ॥

— 454 —

Adapted from PAYNE's "HOME! SWEET HOME!"—

भवन्तु भोगाः सुभगा अभङ्गा
हर्म्याणि रम्याणि सुखावहानि ।
स्वगेहतोऽन्यत्र कृतस्थितीनां
कदापि तोषाय न ते न तानि ॥ १ ॥
गृहं निजं मास्तु निवासयोग्यं
न तत्समं चारु कुतोऽपि किंचित् ।
चकास्ति दिव्यात्र हि कापि शोभा
या दुर्लभान्वेषयतां त्रिलोक्याम् ॥ २ ॥
अवैमि सत्यापि दरिद्रतायाः
स्वमन्दिरं मन्दिरमिन्दिरायाः ।
अमन्दमानन्दमिहैव विन्दन्
दिवोऽपि भर्त्रे स्पृहयामि नाहम् ॥ ३ ॥
भूमिः परेषां सुमनोहरापि
विषादहेतुर्मृगतृष्णिकेव ।
प्रभो पुनः पर्णकुटी मदीया
निवासहेतो रुचये ममास्तु ॥ ४ ॥
मदीयगेहं परितो द्रुमेषु
पुरारुवन् ये मधुरं विहङ्गाः ।
मद्वाचमाकर्ण्य समुन्मुखास्ते
भूयोऽपि चित्तं मम मोदयन्तु ॥ ५ ॥

तदेव गेहं तरवस्त एव
ता एव गावो विहगास्त एव ।
तदेव सर्वं पुनरस्तु देव
स्वास्थ्यं च चित्तस्य पुनस्तदेव ॥ ६ ॥

— 455 —

असाध्यरोगस्य नरस्य वैद्य
मृत्यो क्षणेनैव विनौषधेन ।
भूतं भवन्तं खलु भाविनं च
रोगं समुन्मूलयसि प्रपन्नः ॥ १ ॥

प्रेष्यश्च ते नानयनाय कोऽपि
न वाहनं वा किमपि प्रहेयम् ।
काले समायासि विना विलम्बं
श्रमस्य मूल्यं न हि याचसे च ॥ २ ॥

एवंविधं सर्वगुणोपपन्नं
विहाय वैद्यं निपुणं भवन्तम् ।
वयं यदन्यान् समुपाश्रयामो
हा जीविताशैव किलात्र हेतुः ॥ ३ ॥

सजीवितं रोगमपाकरोषि
विरोगमुश्मश्चिरजीवितं तु ।
त्वं जीवितस्यैशिष एव नित्यं
वैद्यस्तु रोगस्य कदाचिदेव ॥ ४ ॥

— 456 —

Adapted from :—

JAMES MONTOGOMERY'S 'ASPIRATIONS OF YOUTH'—

यशःशैलशृङ्गं समारोह तुङ्गं
शनैरन्तरं संतरन् स्थैर्ययोगात् ।
पदानि क्षिपन्मा स्खल त्वं कदाचित्-
वृथा स्वाङ्गभङ्गाय पातोद्भवाय ॥ १ ॥

बृहज्ज्ञानभाण्डारलुण्टाकभावं
भजन्मा श्रमो मा क्लमो मा विरंसीः ।
युगे धर्ममार्गेण गच्छन् सदैव
समुत्सारयागाद्बलादन्तरायान् ॥ २ ॥

सुखं सद्गुणात्तत्त्वतो नास्ति भिन्नं
सदाचारता चारुता सत्यरूपा ।
निजं मानसं दिव्यजन्मेति जानन्
भुवं भो दिवो भावमापादयस्व ॥ ३ ॥

निजप्रेमपाशैर्दृढैरन्तरङ्गं
समेषां स्वकीये बधानान्तरङ्गे ।
कुरु स्निग्धवाचा सदा शीतलानि
प्रपञ्चोपतापाकुलानां मनांसि ॥ ४ ॥

निजानां निजत्वं परेषां परत्वं
समः सर्वतः सन्नय त्वं समत्वम् ।
समः सर्वभूतेषु यो वर्ततेऽत्र
स जीवः शिवः शङ्करो मूर्त एव ॥ ५ ॥

— 457 —

Adapted from:—

CHARLES MACKAY'S 'CLEON AND I'—

त्वत्क्षेत्रसंपद्विपुला विभाति
मत्स्वामिकः कोऽपि न भूप्रदेशः ।
तवास्ति वासो भवने विशाले
कुटीरमल्पं त्वहमावसामि ॥ १ ॥

रिक्थं प्रभूतं तव पैत्रमस्ति
मया त्ववाप्ता न कपर्दिकापि ।
एवं गतेऽपि त्वमितोऽसि दैन्य—
महं सदानन्दपरायणोऽस्मि ॥ २ ॥

कामं स्थलास्ते शतशो विशालाः
स्थलीं प्रकामं तु विलोकयामि ।
यां प्रीतिमेषा कुरुते ममाक्ष्णो—
स्तस्या न लेशोऽपि धनेन लभ्यः ॥ ३ ॥

तन्द्रादिदोषास्पदतां त्वमागा
अहं बलोत्साहयुतो भवामि ।
दुकूलवासास्त्वमहं कुवासा—
स्तथापि लक्ष्मीमधिकां भजामि ॥ ४ ॥

दासीकृतस्त्वं निजवैभवेन
संकल्पवत् स्वैरगतिश्चरामि ।
चिन्तां विधत्ते भिषजां गणस्ते
केनापि कार्यं तु न मे कदाचित् ॥ ५ ॥

अनल्पवित्तस्त्वमनल्पचिन्त—
श्चित्ते सदा मृत्युभयं बिभर्षि।
मृत्युः समायातु यदा कदाचित्
सिद्धोऽस्मि गन्तुं खलु तेन सार्धम् ॥ ६ ॥

न सृष्टिशोभा हरते मनस्ते
यया कयाचिल्लतया रमेऽहम्।
रुतं खगानां परुषं श्रुतेस्ते
गीतं तु मन्ये मधुरं तदेव ॥ ७ ॥

दत्त्वा समृद्धामपि मे दशां स्वां
त्वं याचसे चेद्विधुरां मदीयाम्।
नाहं विपर्यासमिमं श्रयिष्ये
त्वत्ता तवैवास्तु ममापि मत्ता ॥ ८ ॥

— 458 —

Adapted from :—

ANNE FINCH, COUNTESS OF WINCHELSEA'S 'TO DEATH'—

भो भो भीषणरूप दारुणमते मृत्योऽन्तकृत् प्राणिनां
साम्राज्यं भुवने बिभर्षि निखिले निर्बाधमेव प्रभो।
राजानोऽपि वशे तवेह सकलाः सामात्यभृत्या यदा
सामान्येषु जनेषु दुर्बलतमेष्वस्मासु का वा कथा ॥ १ ॥
ये सन्तो वसुधातले भगवतो भक्ता महान्तोऽपि ते
हा हा विग्रहवान् स्वयं स भगवान् देवाधिदेवोऽपि च
सावेगं प्रहतास्त्वया ध्रुवममी साष्टाङ्गपातं भुवि
व्यापन्नोद्धरणक्षमा अशरणाः सर्वे पतत्यञ्जसा ॥ २ ॥

नाहं वेद्मि न नाम मे विलिखितं हन्तव्यनामावली
प्राप्तव्या बत भूमिवर्धनजनावस्था कदाचिन्मया।
नूनं भीतिमुपैति नो मम मनो यद्भाव्यवश्यं ततः
शय्योपान्तगतान् प्रियांस्तु रुदतो द्रक्ष्यामि बन्धून्कथम् ॥ ३ ॥

तस्माद्भो यमराज मां नय यदा नेतुं त्वदीया मति—
र्मा मा स्वागमनस्य देहि सदयं प्राक् सूचनां कामपि।
हन्तारं सकलस्य जीवनिवहस्य त्वां न कोऽनुव्रजेत्—
मर्त्यो निष्प्रतिकार एव भवने स्वास्थ्यस्य भङ्गेन किम् ॥ ४ ॥

— 459 —

कदाचिन्नासिका नारी नितरां कलहप्रिया ।
पार्श्वस्थं नेत्रयोर्द्वन्द्वं साधिक्षेपमभाषत ॥ १

अहो शाठ्यमिदं वां यन्मदीये वस्तुनि स्वताम्।
आरोपयितुमीहेथे नामसादृश्यदर्शनात् ॥ २

उपनेत्राभिधं वस्तु युवयोर्नैव नेत्रयोः ।
मदीयमिदमित्यत्र विषये नास्ति संशयः। ३

ततो नेत्रे नासिका च कर्णाख्यं न्यायपण्डितम् ।
विवादस्याद्भुतस्यास्य निर्णयार्थमुपागमन् ॥ ४

नासिकापक्षमालम्ब्य जिह्वा वाक्यविशारदा ।
प्रथमं प्राह कर्णाग्रे दर्शयन्त्यात्मचातुरीम् । ५

नन्विदं प्रेक्षतामार्यो यत्सदैवोपनेत्रयोः ।
धार्यमाणतया देहे नासिका स्वाम्यमर्हति ॥ ६

उपनेत्रे इमे धात्रा दीर्घजङ्घे तथा कृते ।
यथा सुखं विदध्यातां नासिकोत्सङ्गसंश्रयम् ॥ ७

नासिका चेदृगाकारा व्यधायि परमेष्ठिना ।
यथोपनेत्रयोः कुर्यादनायासेन धारणम् ॥ ८

एवमन्योन्यसांनिध्यक्षमविग्रहवत्तया ।
अस्या इमे इयं चार्हत्यनयोः प्रणयं परम् ॥ ९

वडवाया यथा पृष्ठे पर्याणं विनिवेशितम् ।
शोभते सुतरां मन्ये तथैवास्या इमे अपि ॥ १०

वदनं नासिकाहीनं कदाचित् क्रियते यदि ।
तदा का कस्य शक्तिः स्याद्रातिर्वार्थेऽत्र दुष्करे ॥ ११

एवं विचार्यमाणेऽत्र वस्तुनि स्पष्टमुच्यते ।
उपनेत्रे नासिकार्थे तदर्था चापि नासिका ॥ १२

श्लक्ष्णां वाचमिमां श्रुत्वा जिह्वया समुदीरिताम् ।
कर्णोऽपि निपुणोऽब्रूत धीरगम्भीरया गिरा ॥ १३

असंशयं वचो जिह्वे निश्चितार्थमिदं तव ।
प्रत्याययति मां मन्ये त्वदुक्तं सत्यमेव च ॥ १४

दिवा सूर्यप्रकाशे वा निशि वा दीपतेजसि ।
सदा नासिकया धार्ये उपनेत्रे निजेच्छया ॥ १५

विरोधो नैव कर्तव्यो नेत्राभ्यामत्र कर्हिचित्
निमीलिततया चैव स्थातव्यामिति निर्णये ॥ १६

— 460 —

## विरक्तस्य शृङ्गारः

अतिरमणीया वनवीथीयं रमयति मन्मानसम् ।
भृङ्गकदम्बकमञ्जुगुञ्जितैर्गायति बहु सुरसम् ॥ १
आह्वयतीयं पृथुलाशिलामयनितम्बतटशोभिता ।
वातेरितमृदुरक्तपल्लवाङ्गुलिभिः सुमभूषिता ॥ २
पुष्पपरागसुगन्धितसुविमलशीतलनिर्झरजलै—
रुपचरतीयं मधुरतरैर्मां तरुवरपतितैः फलैः ॥ ३
मन्दं मन्दं सततं वहता गन्धवहेन स्वयम् ।
छायाद्रुमतलसंविष्टं मां ध्रुवं वीजयेदियम् ॥ ४
तदत्र निर्वृतिमेतु मनो मे यथैव निजमन्दिरे ।
चकोरचरितं चरतादटवीरमणीमुखचन्द्रे ॥ ५
अकृत्रिमोऽस्या एष विभ्रमो मधुरतरो भाति मे ।
संप्रत्यस्या अभङ्गसङ्गमसुखं निर्विशन् रमे ॥ ६
कठिनस्वान्ता मामिह कान्ता विहाय दिवमुपगता ।
नेयं यास्यति धास्यत्यङ्के मृतमपि मामवियुता ॥ ७

— 461 —

## चित्रगतां पत्नीं प्रति

इतो गतायास्त्रिदिवं तवेयं छायापि मत्तापविनोदनाय ।
मूलस्य गम्या यदि नार्थसंपत् तदानुवादोऽपि मुदे न केषाम् ॥ १

गीर्वाणवाणीसदृशी त्वमासीः सदैव मन्मानसरञ्जनाय ।
मृतापि तत्साम्यमुपाव्रजन्ती नाद्याप्यभूमें विमुखीति मोदे ॥
तदेव मन्दस्मितमाननं ते स्निग्धानि तान्येव विलोकितानि ।
चित्रार्पिताया अभिवीक्ष्य कान्ते मन्ये सजीवासि विजीवितापि॥
शय्यागृहे मे स्वपतः स्वतल्पे शिरःसमीपे विनिवेशिता त्वम् ।
यच्चित्रगा दक्षिणभित्तिमेता- मध्यास्य मां दक्षतयाभिरक्षेः ॥
संवाहयन्ती चरणौ मदीयौ या त्वं पुरा भूमितले स्थिताभूः ।
तस्यास्तथाहं खलु पादमूले कति त्रियामा अतिवाहयामि ॥
वियोगदुःखैर्विमनायमाने मयि श्रमं कुर्वति पुत्रहेतोः ।
अचेतनाया अपि दर्शनं ते चैतन्यमुद्भावयतीति भाति ॥
यन्म्लायतो जायत एष मेऽद्य जीवप्रसूनस्य पुनर्विकासः ।
दृष्टिस्त्वदीयामृतमास्रवन्ती संजीवनीयं खलु तत्र हेतुः ॥
ऊर्ध्वप्रदेशात् स्थिरलोचना त्वं कुतूहलाक्रान्तपवित्रचित्ता ।
अधोगतस्य प्रणयाद्रमस्व निरूपयन्ती मम चेष्टितानि ।
न वाक्सुधामोष्ठपुटात् स्रवन्तीं लप्स्ये पुनः कर्णपुटेन पातुम् ॥
अतो मुखेन्दोरवलोकनेन दिवानिशं रन्तुमयं प्रयत्नः ॥
पितेव मातहमितः परं ते जातः सुतानां परलोकभाजः ।
भार्यापि भूत्वा मम दिव्यभर्त्री दृष्टिप्रसादेन कुरुष्व पुष्टिम् ॥
गृहस्य लक्ष्मीर्गृहिणी पुराभू- रितस्ततो मूर्तिमती चरन्ती ।
स्थिरीकृता संप्रति भित्तिभागे स्थिरं मनो मे कुरु साहचर्यात् ।
मातेव काले भगिनीव वापि मद्भ्रातृवर्गस्य कृतोपचारा ।
मातुर्नमाभूर्दुहिता स्नुषा वा समैव सर्वेषु कुटुम्बगेषु ॥

दृढा त्वदीया मयि भक्तिरासीत् गाढो मदीयस्त्वयि चानुरागः।
तथैव भूयादयि सापि सोऽपि सौख्याय नौ जन्मनि जन्मनीह।

— 462 —

**WARWICK—**

Abundance is a trouble, want a misery, honour a burden, baseness a scorn, advancements dangerous, disgrace odious. Only a competent estate yields the quiet of content. I will not climb, lest I fall, nor lie on the ground, lest I am trod on.

कल्पेत वैपुल्यमुपद्रवाय
दैन्याय वैकल्यमहर्निशं च ।
मन्येय मानं गुरुभारमूढं
क्षुद्रस्य मे स्यादवहेलना च ॥ १ ॥
पुरो गतिर्मे भयमादधाति
नीचैः स्थितिर्मां विमनीकरोति ।
नारोढुमीहे बत पातभीत्या
विमर्दशङ्की न शये च भूमौ ॥ २ ॥
मद्योग्यमर्थं च पदं च देहि
भो नाथ मह्यं तव सेवकाय ।
न्यूनस्य दानं जनयेद्विषादं
सुखाय न स्यादधिकस्य वापि ॥ ३ ॥

# शुद्धिपत्रम्.

| पत्रम् | पङ्क्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ३ | ९ | La Fountain | La Fontaine |
| ६ | १६ | Heractitus | Heraclitus |
| १८ | ३ | } | |
| ५८ | २७ | } Anonimous | Anonymous |
| ६२ | १७ | } | |
| ७५ | ३ | | |
| २१ | ३ | Whitter | Whittier |
| २७ | २१ | प्रणय कुपितानां | प्रणयकुपितानां |
| २९ | २१ | Rochefoucault | Rochefoucauld |
| ३० | १० | चेदिदम् | न चेदिदम् |
| ४० | ७ | ॰मेवतु | ॰मेव तु |
| ५२ | २५ | नङ्क्ष्ययन्तो। | नङ्क्ष्यन्तो। |
| ५७ | ८ | Lord Landsdown | Lord Landsdowne |
| ६२ | २५ | La Place | Laplace |
| ७१ | १३ | स्वायत्त | स्वायत्तं |
| ८४ | ५ | मानवा। | मानवाः |
| ९३ | ७ | स्फुटानिचा।॰ | स्फुटानि चा।॰ |
| ९३ | ८ | ॰हस्म दभ्य॰ | ॰दस्मदभ्य॰ |